
वैशाखमासः
वर्षम् –६७
सप्तमोऽङ्कः
विक्रमाब्दः २०७३
युगाब्दः ५११८
५ मई २०१६

ISSN 2249-698X

# भारती

## संस्कृत-मासपत्रिका

एकस्याः प्रतेः
१५/–
वार्षिक–शुल्कम्
१२०/–
आजीवनसदस्यता
१५००/–



राष्ट्रगौरवशिक्षायै गीताञ्जलि मिहार्पयन्।
विश्ववन्द्यः कवीन्द्रोऽसौ रवीन्द्रोऽस्त्यजरामरः॥

## विषय-सूची


| क्र.सं. | विषयाः | निबन्धकाराः | पृष्ठ-संख्या |
|---|---|---|---|
| १ | मङ्गलाचरणम् | श्री प्यारेमोहनशर्मा | ३ |
| २ | मासावतरणम् | श्री प्यारेमोहनशर्मा | ३ |
| ३ | सम्पादकीयम् | श्री प्यारेमोहनशर्मा | ४ |
| ४ | विश्वकवी रवीन्द्रनाथः | म.म. देवर्षिकलानाथशास्त्री | ५ |
| ५ | विनियोगमन्त्रव्याख्या | पं. रामनारायणः शास्त्री | ९ |
| ६ | सोरठासौष्ठवम् | प्रो. अभिराज राजेन्द्र मिश्रः | १३ |
| ७ | सकारादि-सीताशतनाम | श्रीकृष्ण दाधीच | १४ |
| ८ | वैयाकरणस्य समसनवैदुष्यम् | डा. सुरेन्द्रकुमारशर्मा | १५ |
| ९ | अपूर्णा संस्कृतं विना वर्तमानशिक्षा | अंजना शर्मा | १६ |
| १० | संयुक्तपरिवारे कर्त्तव्यनिष्ठता रामायणकालसन्दर्भे | स्वाति जैन | १७ |
| ११ | गीतम् | परमानन्द शर्मा ''प्रमोद'' | १९ |
| १२ | पुस्तकसमीक्षा | म.म. देवर्षिकलानाथशास्त्री | २० |
| १३ | बाबासाहेबआप्टे महोदयानां व्यक्तित्ववर्णने- | वेणीमाधव गो. धर्माधिकारी | २३ |
| १४ | प्रेरकप्रसङ्गशतकम् | श्रीमती आराधना धर्माधिकारी | २४ |
| १५ | भारतीमञ्जुनिकुञ्जम् | डॉ. रामनारायण झा | २५ |
| १६ | आत्मसम्प्रत्ययः | यादवेन्द्र शर्मा | २६ |
| १७ | यत्र विद्या विमुक्तये | डॉ. राजेश्वरी भट्टः | २८ |
| १८ | आयुर्वेद स्तम्भः | प्रो. बनवारीलालगौडः | ३१ |
| १९ | पंचाङ्ग | निदेशालयः, संस्कृत-शिक्षा, राज. | ३५ |


### पाठकेभ्यो निवेदनम्

संस्कृतसुधियः पाठकाः निवेद्यन्ते यद् भारत्यां प्रकाशिताः शोधलेखाः, सामयिकनिबन्धाः, कविताः, कथाः, विनोदवार्ताः, लघुनाट्यकृत्यादयो भवद्भ्यः कथं रोचन्ते ? स्वविचारयुक्तपत्राणि निम्नलिखितसङ्केतोपरि संप्रेष्यानुगृह्णन्तु- **सम्पादक, 'भारती' संस्कृतमासिक, भारतीभवन, बी-15, न्यू कॉलोनी, जयपुर-302001**

**दूरभाष: 0141-2379014, मो. 9783105699**

**(धनादेश/चैक/ड्राफ्ट केवल ''भारती'' के नाम से ही भेजें- प्रबन्ध सम्पादक)**



।। श्रीशः ।।

ISSN2249-689X

# भारती

## संस्कृत-मासपत्रिका



**प्रमुखसंरक्षकाः**
जगद्गुरवो निम्बार्कपीठाचार्याः श्रीराधासर्वेश्वरशरणदेवाचार्याः,

**प्रमुखसंरक्षकाः**
जगद्गुरुशङ्कराचार्यस्वामिश्रीजयेन्द्रसरस्वतीमहाभागाः

**प्रेरणास्रोतः**
स्व. परमाचार्यः
श्रीचन्द्रशेखरेन्द्रसरस्वतीमहाभागः

संस्थापकौ
स्व. उमाकान्तकेशवआप्टे
( बाबा साहब आप्टे )
स्व. श्रीगिरिराजशास्त्री ( दादाभाई )

संरक्षकाः
स्वामी विश्वेशतीर्थः
स्वामी सत्यमित्रानन्दगिरिः
स्वामी रामभद्राचार्यः
आचार्यः अविचलदासः
स्वामी विद्यानन्दसरस्वती

प्रधानसम्पादकः
देवर्षिकलानाथशास्त्री

सम्पादकः
प्यारेमोहनशर्मा

प्रबन्धसम्पादकः
सुदामा शर्मा

सहसम्पादकाः
प्रो. सुरेन्द्रकुमारशर्मा
शिवशरणनाथत्रिपाठी
डॉ. शिवचरणशर्मा

आर्थिकपरामर्शदाता
ओ.पी. गोयल

पृष्ठसंयोजनम्
श्याम प्रिन्टर्स, 22 गोदाम, जयपुरम्
rajeshksharma69@gmail.com - 01414001974

## मङ्गलाचरणम्

आत्मानं जगदीश्वरं हि मनुते दम्भेन यः काश्यपिः
अत्यन्तं बलशालिनं न समरे मां कोऽपि जेतुं क्षमः
वक्तारं पितरं यदा प्रियसुतः प्राबोधयत् यद् ऋतम्
प्रह्लादस्य सुरक्षकं नरहरिं वन्दामहे सादरम्।।

## मासावतरणम्

वैशाखेऽपि वसन्त एव विदितः पुष्पैः प्रफुल्लैः शुभैः।
नानावर्णमयैः सगुन्धितसुमैः राराजते काश्यपी।
द्योतन्ते परितो वनानि बहुभिः श्यामैः शुभैः पादपैः।
नृत्यन्तीव विभाति सम्प्रति धरा दृष्ट्वागतं माधवम्।।

कार्यालयः
बी-15, भारतीभवनम्
न्यू कॉलोनी, जयपुरम् ( राज. )
ई-मेल sanskritbharti09@gmail.com

वैशाखमासः
वर्षम् 67
वार्षिकशुल्कम् 120/-

विक्रमाब्दः 2073
मई, 2016
पञ्चवार्षिकशुल्कम् 500/-
आजीवनसदस्यताशुल्कम् 1500/- रूप्यकाणि

अङ्कः - 7

( राजस्थानसंस्कृत-अकादम्या आर्थिकसहयोगेन प्रकाशिता )

## सम्पादकीयम्

# आतङ्कवादाभिशापः

...✍ पं. प्यारेमोहनशर्मा

आतङ्कवादस्य समाप्तिसमयः समायात इति प्रतीयते। विश्वस्य राष्ट्राणि चिन्तयेयुः संयुक्तराष्ट्रसंघोऽपि विचारं कुर्यात् यद्विश्वमातङ्कच्छायायां जीवनं यापयितुममिलषति उत शान्तिपूर्णे वातावरणे जिजीविषति। सम्प्रति यत्र कुत्रापि बमविस्फोटभयं प्रत्यहं वर्धते, अन्यत्र च आई. एस. आई. एस. सदृशानि संघटनानि प्रसारयन्ति-आतङ्कवादभयम्। गतदशवर्षेषु यया रीत्या-आतंङ्कवादः स्थायित्वं भजते एतेन त्विदमेव प्रतीयते यद् योजनाबद्धप्रकारेण कार्यमिदं संचालयन्ति विभिन्नानि संघटनानि। परन्तु आतङ्कवादं समापयितुं न विद्यते कस्यापि सविधे सुदृढा रणनीतिः। प्रत्येको देशः स्वकीयरीत्या आतङ्कवादेन युध्यति। परन्तु चिरं यावदपि भविष्यति साफल्यं न दृष्टिपथमायाति। एतस्य कारणं नान्यत् किमपि प्रत्युत सत्यनिष्ठया आतङ्कवाद समापनेच्छाया अभाव एव। मुंबई पेरिसदेशयोः प्रकारेण बेल्जियम-देशस्य राजधान्यां बेसल्सनगर्यां संजात-आतङ्कवादाक्रमणं मानवतायाः कृते गभीरश्चिन्ता-विषयो वर्तते। भारतपाकिस्तानातिरिक्तम् अरबदेशः यूरोपीय देशाश्चापि आतङ्कवादिनां लक्ष्यभूताः संजाताः। एतेन सिद्धयति यत् सम्प्रति विश्वस्मिन् विश्वे नहि कोऽपि देशः सुरक्षितः।

संयुक्तराष्ट्रसंघम् अमरीकां च विहाय विश्वस्य सर्वे देशाः चिरात् आतङ्कवादं समूलमुन्मूलयितुं प्रयतन्ते। परन्तु आतङ्कवादः पृथक् पृथक् देशेषु स्वात्मानं संस्थापयितुं साफल्यं लभते निरन्तरम्। कुत्रचित् वायुयानस्थितिस्थानेषु (एयरपोर्ट) आक्रमणेन निरागसां जनानां रक्तं प्रवाहयति कुत्रचित् विद्यालयीयबालकान् मृत्योर्मुखे पातयति। प्रश्नः एष विद्यते यत् किमिति एतत् सर्वं जायते ? एतदर्थं वस्तुतो दोषी कः विद्यते ? विश्वस्मिन् विश्वे अङ्गुलिपरिगणनीया जनाः शान्तिं नाभिलषन्ति ते चातङ्कवादं स्वकीयो व्यवसाय इति मन्वते परन्तु न केवलं यो महतोऽपभाषते शृणोति तस्मादपि यः स पापभागिति कालिदासवचनानुसारं तेऽपि दोष-भाजो विद्यन्ते ये अप्रत्यक्षरूपेण मौनेनातङ्कवाद-सहयोगिनो जायन्ते। अत्रायं प्रश्नोऽपि सम्मुखे समायाति यदातङ्कवादिनः शस्त्राणि कुतो लभन्ते? किं सम्पन्नदेशानां माध्यमेन शस्त्राणि-एते आतङ्कवादिनो न प्राप्नुवन्ति? एकत आतङ्कवाद-समाप्तिमभिलषन्ति अपरतश्च शस्त्र-निर्माणसंस्थानानां माध्यमेन विपुलं धनलाभं लभन्ते। अत्र सत्यमिदमेव वर्तते यत् यदि आतङ्कवादिनः शस्त्राण्येव न प्राप्नुयुस्तदा शस्त्ररहिता निर्बलास्ते न किमपि कर्त्तुं शक्नुवन्ति। अस्मिन् विषये सत्यमिदमेव यन्मुखे रामः पार्श्वे च छुरिका-धारणकर्तारः केचन देशाः मानवतायाः शत्रुभूता आतङ्कवादं समर्थयन्ति ते केवलं स्वार्थं पश्यन्ति।

जयन्तीप्रणतिः

❑ म.म. देवर्षिकलानाथशास्त्री

# विश्वकवी रवीन्द्रनाथः

विश्वपटले भारतीयमनीषाध्वजोत्तोलकः, शान्ति-निकेतनाख्याया उन्नतशिक्षासंस्थायाः संस्थापकः ''नोबेल'' पुरस्कार-विजेता वाङ्गधररत्नं, साहित्यमनीषी कवीन्द्रो रवीन्द्रनाथः सरस्वत्या वरप्राप्तो महापुरुषोऽभूद् यः स्वयं महाकविरप्यभूत् सङ्गीतप्रवीणोऽप्यभूत् (यस्य नाम्ना रवीन्द्रसङ्गीतमद्यापि जागर्ति) चित्रकारोऽप्यभूत्, राष्टभक्तोऽप्यभूत्। तस्यैव लेखन्या विलिखितमेकं गीतमद्य भारतस्य राष्ट्रगीतमस्ति (जनगणमन अधिनायक) अपरं च बांग्लादेशाख्यस्य राष्ट्रस्य राष्ट्रगीतमस्ति। विश्वविदितः साहित्यपुरस्कारः ''नोबोल प्राइज'' नाम्ना विख्यातोऽस्मै ''गीताञ्जलि'' नामकस्य मुक्तगीतसङ्ग्रहस्य कृते 1913 ई. वर्ष समार्प्यत। 1915 ई. वर्षे ''सर'' इति सम्बोधनमर्जयन् ''नाइट'' उपाधिरपि ब्रिटिश-साम्राज्येनाऽस्मै प्रादीयत किन्तु 1919 ई. वर्षे पञ्जाब प्रान्ते जलियाँवाला बाग परिसरे आङ्गलशासन-प्रतिनिधिभिर्यो निर्दयो मानवसंहारः कृतस्तस्य विरोधेऽनेनायमुपाधिः प्रत्यावर्तितः। महात्म-गान्धिनः प्रशंसकः परमराष्ट्रभक्तोऽयं भारतीयानां हृदयेश्वर इति जानन्त्येव राष्ट्रभक्ताः।

ब्राह्मसमाजसंस्थापकस्य महर्षि देवन्द्रनाथ टैगोर (ठाकुर) महाभागस्य पुत्रत्वेन 7 मई 1861 ई. दिवसे लब्धजन्मनो रवीन्द्रनाथ टैगोर (ठाकुर) स्य शिक्षा गृह एव वङ्गभूम्यां समजनि। वाङ्गभाषायामाङ्गलभाषायां च प्रावीण्यं संस्कृतादिभाषाणां ज्ञानं चाधिगम्यानेन भूयांसि काव्यसङ्कलनानि प्राकाश्यन्त। 1880 वर्षमारभ्य **मानसी (1890) वाङ्गीयकाव्य-जगति** क्रान्तिमानीतवती। परिवारोऽस्य सैयदपुर (सियलदाह) भूमिपतीनां परिवारो-ऽभूदतः समृद्धेरानन्दमधिगत्याऽप्यनेन गङ्गातटस्थ-सामान्य-जनैः सह सख्यं साहचर्यं च सङ्कल्पितं, भारतभूभक्तिरनुसृता। ''सोनार तरी'' (1893) चित्रा (1896) चैताली, कल्पना, क्षणिका (1900) नैवेद्य (1901) प्रभृतिकाव्यसङ्कलना नि, चित्राङ्गदा (1872) मालिनी (1895) प्रभृति नाट्यरचनाश्चास्य यशो दिग्दिगन्तेषु प्रासारयन्।

1902-1907 वर्षान्तरालेऽनेन बहूनि वियोग-कष्टानि सोढानि, पत्नी दिवमारूढा, एकः सुतः एका सुता च लोकमिममत्यजन् किन्तु हृदयाघातैरेभिरस्य काव्यप्रतिभा नाऽपकृष्टा, अपितु निकषोपरि प्रतिभाहेम्नः प्रोज्ज्वलता प्रकर्षं प्राप। तदनन्तरं तु विश्वस्मिन्नपि विश्वे व्याख्यानानां कृतेऽयमामन्त्रितोऽभूत्। योरप अमेरिका-चीन-जापान-मलाया-इन्डोनेशियाप्रभृतिदेशेषु व्याख्यानमालाभिरनेन भारतीयं यशः सर्वत्र प्रासारि। सोऽयमुपन्यासकारत्वेनापि मूर्धन्यां ख्यातिमलभत, ''गौरा (1910)'' नामक उपन्यासो भारते विख्यातिमलभत यस्याङ्गल-भाषानुवादो (1924) विश्वस्मिन्नपि विश्वेऽस्योपन्यासकारत्वख्यातिं प्रासारयत्। रवीन्द्रसङ्गीतस्य रवीन्द्रप्रणीतानां चित्राणां चाऽपि नितान्तमुत्कृष्टः स्तर एतस्य कीर्तिं सर्वत्र प्रासारयत्।

रवीन्द्रनाथठक्कुरस्य शिक्षाविषयकं चिन्तनमपि नितरां युगान्तरकारि सिद्धम्। तदानीं हि विश्वविद्यालय-शिक्षा पाश्चात्यैर्यथाप्रवर्तितत्वेन सर्वत्र भारते बद्धमूला ब भूव। को न जानाति मैकालेमहाभागस्य 1835 ई. वर्षीयं शिक्षापद्धतिशासनविषायकं भाषणं कथं भारते शिक्षाया इतिहासस्य नवीनं युगं प्रावर्तयदिति। किं वयं पाश्चात्यानां पदाङ्कानेवानुसृत्य शिक्षां प्रकटयिष्यामः? किं नाऽभूदस्यमाकं कश्चनाऽपि शिक्षाविषयक इतिहासः ? सर्वमिदं विचिन्त्य पूर्णतो भारतीयानादर्शान् संगृह्य विश्वविद्यालयीयशिक्षां प्रवर्तयितुंमनेन विनिश्चयो विहितः, ऋषिकुल-गुरुकुल-तपोवनादिप्रभृतीनां पावन-परम्पराः, नूतनविज्ञानस्य विश्वजनीनायाः कलायाश्च सिद्धान्तान् संघटय्य यदुच्चशिक्षायाः संस्थानम् बोलपुरे (कोलकत्ता) 1901 ई. वत्सरेऽनेन संस्थापितं तेन निरन्तरं विकासयात्रा

प्रारब्धा। 1921 ई. वर्षे विश्वभारतीविश्वविद्यालयो नूतनमितिहासमेदव कंचन व्यरचयत्। शिक्षाया: संस्थानेनानेन भारतस्य गौरवं यथा समेधितं तत् सुविदितं शिक्षाजगति।

भारतीयस्य स्वातन्त्र्यसङ्ग्रामस्य मूर्धन्य: समर्थक:, महात्मगान्धिनो महात्मत्वस्य प्रथम: पूजक:, भारतराष्ट्रस्य सुमहान् जननायकोऽसौ राजस्थानेऽपि भरतपुर-नगरे 1927 ई. वर्षे अखिलभारतीय हिन्दी साहित्य सम्मेलनस्य सप्तदशेऽधिवेशने (31 मार्च) मुख्यातिथित्वेनाऽऽमन्त्रितो भरतपुरधराधीशस्य सम्मानं स्वीकृतवान्, तत्र ''नीलमणिलता'' शीर्षकं काव्यमरचयत् इति राजस्थान-वासिनोऽद्यापि स्मरन्ति। अहमपि स्पष्टं स्मरामि यदेतस्यामरसाहित्यकारस्य स्मृतावेव जयपुरे 15 अगस्त दिने 1963 ई. रवीन्द्रमञ्चाख्यस्य सुविशालस्य नाट्यगृहस्य स्थापनाऽक्रियत। 1961 ई. वर्षेऽस्य जन्मशताब्दी समस्तेऽपि देशे सोत्साहं समायोज्यत, मया सर्वत्र सोत्साहमस्य स्मृतये श्रद्धार्घ्यं समार्प्यत। अनेकेषु नगरेषु रवीन्द्रभवन-टैगोर हालप्रभृतिनामभिरेतस्य स्मृतौ सभा-भवनानि नाट्यगृहाश्चास्थापिषत। स्वतन्त्रताया: समर्थकस्यास्य महापुरुषस्य स्वर्गारोहणं 7 अगस्त 1941 दिनाङ्के स्वातन्त्र्यप्राप्तेर्वर्षषट्कपूर्वमेव सञ्जातमिति तु कथान्तरं किन्त्वस्य यश:शरीरमजरामरं स्थास्यतीति न कश्चनापि सन्देह:। वन्दामहे रविमिमं हार्दिकैर्भावकुसुमै:, प्रणतिगीतिं च समर्पयाम एतच्चरणेषु।

ऐषम: 156 तमजयन्त्यवसरे विश्वकविमिमं सश्रद्धं स्मरति भारतम्। भारती-परिवारोऽस्य गीताञ्जले: संस्कृतानुवादं प्रस्तौति पाठकेभ्य: प्रतिमानमिषेण।

**अजरामराय विश्वकवये काव्यार्घ्यम्**

प्राचीजलधितटादरुणाभ: कोऽयं रविरुदियाय?
दिग्वनिता विजहुर्मदतन्द्रां कस्यालोकलयाय?
पुनरद्यापि मुखरयति माघवनीं दिशमेष रव:।
विद्यापतिकृतिझङ्कृतिमनुगुञ्जन्त्येते तरव:।
मृद्वीकामधुरसमधरं कलयन्ती मृदुरणिता।
केनेयं पुनरपि जयदेवकवेर्वीणा क्वणिता?
आप्याययसि धरित्रीमखिलां वाङ्मकरन्द-झरेण।
कोमल-कलित-कान्त-पद-गुम्फित-कविकृति-पीयूषेण।
रसमनादिमानन्दमुदात्तं वर्षन्ती रमणा।
रसनामाद्रियते खलु ते रचना भावप्रवणा।
रति-धृतिशङ्कोत्साह-स्मृति-चापल्य-हर्षजडता:।
मानवीयभावास्तथ्या: काव्ये भवता कलिता:।।
निश्छलहृदया बालाऽऽसौ तरुणी स्नेहाऽऽकुलिता?
वात्सल्यार्द्रमना माताऽपत्यप्रेमी च पिता।।
किमप्यपूर्वं भावजगत् सुकवे! भवता सृष्टम्।
जीवति, वदति, चलति, पश्यति यत् सहृदयहृदि जुष्टम्।।
भवता जलधर-सौदामिन्यो: प्रेमालाप-कथा:।
मूर्छितमानवताया: क्रन्दनदिग्धा मनोव्यथा:।।
यौवनमधुवन-वल्लरीषु हृत्कोकिलकलविरुतम्।
नयनसरित्तीरे विरहिण्या: क्रौञ्च्या: करुणरुतम्।।
सर्वमनादिमानवीयं गाथागीतं पठितम्।
क्रान्तदर्शिभिर्नयनैरवलोकितमधरैर्गदितम्।।
वर्षशतं तव निर्जर-कविकीर्तेरेको दिवस:।
भास्करलक्षं जनयेदणुरेकोऽ प्येतन्महस:।।
यावद् हिमधवले कैलासे नृत्यति सुरापगा।
यावत् कालिदासवाणी सुधियां हृदये सुभगा।।
यावन्मनुजो जीवति जगतीमालोकयति रवि:।
यावन्मानवहृदयान्त: स्प्रष्टुं शक्नोति कवि:।।
तावद् दिगदिगन्तगेया गुञ्जिष्यति कल्याणी।
जनगणमनसो नेतुर्भवतोऽमृतम्भरा वाणी।।

**देवर्षिकलानाथशास्त्री**

(महामहोपाध्याय: राष्ट्रपतिसम्मानित:)

अध्यक्षचर: आधुनिकसंस्कृतपीठस्य, जगद्गुरुरामा-नन्दाचार्यराजस्थानसंस्कृतविश्वविद्यालये, प्रधानसम्पादक: ''भारती'' संस्कृतमासिकस्य भूतपूर्व: अध्यक्ष:, राजस्थान-संस्कृत अकादम्या: तथा निदेशक: संस्कृतशिक्षा एवं भाषाविभाग, राजस्थान सरकार। सी/8, पृथ्वीराज रोड, सी-स्कीम, जयपुर।

## गीताञ्जलि-मुक्तकचतुष्टयम्-

विश्वकवे रवीन्द्रनाथठक्कुरस्य प्रभूता रचना: संस्कृते-ऽनूदितास्तस्य प्रशंसकै: साहित्यकारै:। ''गीताञ्जले:'' अनेके अनुवादा: प्रकाशिता: सन्ति। बह्वय: कथा अप्यनूदिता: उपन्यासा अपि। ''चौखेर बाली'' इत्याख्या-निकाया: संस्कृतानुवादो जयपुरीयैर्गोस्वामिहरिकृष्ण-शास्त्रिभि: कृतोऽभूत् (आँख की किरकिरी इति हिन्द्य-नुवादमाश्रित्य)। भारत्या: सहसम्पादकचरै: स्व: श्रीरामदवे महाभागै: ''गीताञ्जले'' र्योऽनुवाद: कृतोऽभूत् तस्य कतिपया रचना अत्र प्रस्तूयन्ते प्रतिदर्शरूपेण-प्रधानसम्पा.)

**( विश्वकवी-रवीन्द्रनाथ: )**

## निष्ठुरा-दया

**( अनु. पं. श्रीरामदवे )**

अनन्तो मे वासनावह्नि:
करुणा-क्रन्दनमप्यस्ति में ह्यनन्तम्
तथापि रक्षितोऽस्म्यहं त्वया
स्वकीयेन निशितेनाङ्कुशेन
येन नाहं भस्मीभूतोऽस्मि तस्मिन्
त्वदीयेयं निष्ठुरा दया
मम जीवनस्य कणे कणे
व्याप्तास्ति पूर्णरूपेण।।1।।
नाहं याचे त्वाम्
प्रकाशाकाशदेहप्राणभिक्षाम्
कामये केवलमिदमेव देव !
कुरु मां लालसात्राण-योग्यम्
एतदेव मत्कृते भविष्यति महादानम्।।2।।
त्वदन्वेषणाय क्वचित् श्रान्तेक्षण:
अर्ध-प्रबुद्धश्चलन्नस्मि मार्गे त्वदीये परं हे निर्मोहिन्।
त्वम् मार्गादपसृत्य आवरके तिष्ठसि
अवगतं मया अस्य रहस्यम्।।3।।
अस्मात् निर्बल-निराधारवासनाजालात्
आत्मन: पूर्ण-संगमार्हं विधत्से,
अस्या: ते निष्ठुरदया: रहस्यम्
अवगतं मया सम्यक् अवगतं सम्यक्।।4।।

## परिचय:

कियन्तोऽनभिज्ञा: कृता: सन्त्यभिज्ञास्त्वया
कियत्सु परावासेषु मे कल्पितो निवासस्त्वया
दवीयांस: कियन्तोऽनुष्ठिता: नेदीयांसस्त्वया।
परकीयाश्च विहिता: आत्मनीनास्त्वया।।1।।

पुरातनं स्वनिकेतनं विहाय परगृहं प्रविशतो मे,
चिन्ता बभूव चित्ते को मे भवेदात्मनीनो नु तत्र
एतदपि विस्मृतं मया यत्त्वम् तु चिरपरिचित: आत्मनीनो
भवेरेव तत्र क्रियन्ते त्वया दवीयांसो नेदिष्ठा: परकीयाश्च
आत्मनीना:।।2।।

जीवने उपरमे इहलोके परलोके,
यत्र कुत्रापि नेष्यसि त्वं माम्,
तत्र जन्मजन्मान्तरसंस्तुतस्य भवितैव ते संगम:।
त्वत्परिचितोऽहम् कस्य अपरिचितो भवेयम्
कुत्र स्यात् वा गमने प्रतिबन्ध:
कुत्र वा स्यात् प्रव्रजने भीति:
त्वं तु एकीकृत्य जगदिदं समस्तम्
तस्य त्राणाय जागरितस्तिष्ठसि नित्यम्
बन्धो! क्रियन्ते त्वया दवीयांसो नेदिष्ठा:
परकीयाश्च आत्मनीना:।।3।।

## पुनर्जन्म

न जाने कदा मया प्रथमं समुल्लंघिता देहली
का आसीत् सा शक्ति:
या माम् अस्मिन् विशाले, रहस्यपूर्णदेशे
उदयप्रेरणां प्रदत्तवती।
यथा निशीथे अरण्ये स्फुटिता भवति कुसुमकलिका।
प्रभाते यदा मया विलोकिता: प्रकाशरश्मय:
तदा त्वरितमेव मया विदितम्
अस्मिन् रहस्यपूर्णे प्रदेशे
नाहम् एकाकी एव, नितराम् विचित्रपुरुष: सोऽपि अज्ञात:
कापि निराकारा शक्ति:
माम् आत्मजोपमं आत्मन: क्रोड़े स्थापितवती।

मृत्युकालेऽपि सा एव अज्ञाता
परम् अनन्तकालात् परिचिता
जननीव मां आत्मनः अंके ग्रहीतुम् आगमिष्यति
जीवनप्रणयी अहम् मृत्युप्रियो भविष्यामि।

यथा मातुः दक्षिणस्तनात् वियुक्तः शिशुः रोदिति परं
सहसैव सः वामपार्श्वं लब्ध्वा मौनं भजते
तथैव जीवनान्मुक्तस्य मृत्युलाभोऽपि
क्षणिकवियोगः संयोगोपम एव।

**पराजयः**

अद्य अहम् त्वाम् आत्मनः पराजयमालाभिः
स्मृतिचिह्नैश्च अलंकरिष्यामि।
अपराजितस्य मे दुष्करं बहिर्गमनम्।

खण्डितो भविष्यति मे दर्पः
अतिवेदनया मम जीवनस्य
अवरुद्धाः कोषाः स्फुटिताः भविष्यन्ति
मदीयं रिक्तहृदयं गीतानां विकीर्णस्वरैः विलपिष्यति
पाषाणाः अपि द्रवीभूताः भविष्यन्ति अश्रुधाराभिः
जाने अहम् एतत्।

इदमपि च जाने
कमलानां सहस्राणि पत्राणि
नहि सर्वदैव तारुण्यं भजिष्यन्ति
तेषां मधुकोषोऽपि
नहि नित्यं पूरित एव स्थास्यति

आकाशात् नेत्रयुगलं निर्निमेषं निरीक्षमाणम्
तूष्णीमेव च माम् आकारयिष्यति।
तदा मत्कृते न किमपि अवशिष्टं स्थास्यति, न किमपि।
तव चरणेष्वपि, मृत्युवरदानमेव लप्स्ये।

अद्य अहम् त्वां पराजय-विभूषणैः अलंकरिष्यामि
अपराजितस्य मे दुष्करं निष्क्रमणम्।

# निवेदन

भारती पत्रिका कार्यालय अपने आदरणीय ग्राहकों तक प्रतिमाह समय पर पत्रिका पहुँचाने की व्यवस्था सुनिश्चित करना चाहता है। इस दृष्टि से सभी ग्राहकों से निवेदन है कि निम्नानुसार अपनी सूचनाएं कार्यालय को पोस्ट कार्ड द्वारा अथवा इसी पत्र को काट कर लिफाफे में कार्यालय के पते पर भेजने का श्रम करें। यदि उक्त प्रकार से सूचना भेजने में कठिनाई हो तो मोबाइल नं.– 09352030291 / 8947055999 पर सूचना लिखवा सकते हैं अथवा **SMS** भी कर सकते हैं।

**नाम....................................पुत्र/पुत्री श्री............................भवन संख्या...........**

**गली/ मोहल्ला/कॉलोनी..................................वाया/पोस्ट ऑफिस..........................**

**तहसील................................जिला........................राज्य..........................**

**देश....................पिन.......................................दूरभाष............................**

**मोबाईल नं...........................ईमेल...................................................**

निवेदक **सुदामा शर्मा**, प्रबन्ध सम्पादक
**भारती संस्कृत मास पत्रिका**
बी–15, भारती भवन, न्यू कॉलोनी, जयपुर–302001 (राज.) दूरभाष–2379014
ई–मेल – sanskritbharti09@gmail.com

# विनियोगमन्त्रव्याख्या

❑ पं. रामनारायणः शास्त्री

**अग्ने व्रतपते व्रतं चरिष्यामि तच्छकेयं तन्मे राध्यताम्। इदमहमनृतात् सत्यमुपैमि।। यजुर्वेदः १/१५।। अग्ने व्रतपत इति। व्रतपते व्रतम् चरिष्यामि तत् शकेयम् तत् मे राध्यताम्। इदम् अहम् अनृतात् सत्यम् उपएमि इति उपैमि।।**

ब्राह्मणग्रन्थेषु यज्ञकर्मणि विनियोगपूर्वकं मन्त्राणां व्याख्यानं विधीयते। शुक्लयजुर्वेदीयमाध्यन्दिन-शतपथब्राह्मणे दर्शपौर्णमास-प्रकरणे व्रतोपायन-विधौ मन्त्रस्यास्य विनियोगः। मूलसंहितायां मन्त्रस्य ऋषिः प्रजापतिरस्ति। देवता-वर्ण्यविषयश्च अग्निर्वर्तते। अत्र मन्त्रे अग्ने व्रतपते इति पदद्वयम् सम्बोधने वर्तते। अग्निरत्र विशेष्यं व्रतपतिश्च विशेषणम्। चरिष्यामि शकेयम् राध्यताम् उपैमि इति चत्वारि क्रियापदानि। इदम् अहम् इति कर्ता। व्रतं चरिष्णुर्मानवः स्वव्रतसंसिद्ध्यै व्रतानुष्ठानपूर्णतायै वा अग्निमेवा-भीक्षमाणस्तं प्रार्थयति। अग्ने व्रतपते-हे ज्ञानस्वरूप अग्रगन्तः। अग्रनेतर्वा व्रतपते! त्वं हि व्रतपालकोऽसि। सत्यधर्मयज्ञादिशुभकर्मणां पालकपोषक-रक्षको वर्तते भवान्। भवत्कृपया अनुग्रहेण वा व्रतं चरिष्यामि- सत्यं धर्मं वा आचरिष्यामि। स्वीये जीवनव्यवहारे व्रतमेतद् अनुष्ठास्यामि धारिष्यामीति अभिलाषः। तद्व्रते-सत्यधर्मानुष्ठाने समर्थोऽहम् भवेयम्, येन व्रतं मम पूर्णं भवेत् तदर्थं भवन्तं प्रार्थये तन्मे व्रतं भवान् संसिद्धयताम्। इदमहम् मानवजीवोद्देश्यं पुरुषार्थ-चतुष्टयं चिकीर्षुर्मानवोऽहम् अनृतात्- असत्याचरणात् भवदाज्ञातिक्रमणरूपमिथ्याव्यवहार-रूपमानुष-व्यवहारात् सत्यमुपैमि - सत्यधर्म-भवदाज्ञा-पालनरूपदेवभावं प्राप्नोमीति मे व्रतम्। मन्त्रेऽत्र अग्नित्वेन परब्रह्म परमपिता परमेश्वर एव प्रार्थ्यते यतो हि स एव व्रतपतिः - सर्वेषां व्रतपालको विद्यते।।

''हे यज्ञनियमाध्यक्ष, हे अग्ने !'' अहं यज्ञकार्यमनुष्ठास्यामि तत्कर्मानुष्ठातुमहं शक्तो भूयासम्। तन्मम कर्म निर्विघ्नं सम्पद्यताम्। अनृतं मानुषो भावः। सत्यं देवभावः। तदाहं यदिमं यज्ञं कर्तुं प्रवृत्तोऽस्मि तदिदमहमेतस्मान्मर्त्यान्मनुष्य-भावादुद्गत्य सत्यं देवताभावं गच्छामि। मनुष्येभ्यो देवानुपावर्ते इति भावः। अतएव चानृत-भाषणादुपरतः सत्य-भाषणनियमं स्वीकरोमि इति ओझा महाभागः।

अग्ने ! - अगि गतौ+नि अङ्गेर्नलोपश्च इति-औणादिक प्रत्ययः। आमन्त्रितस्य च इति सूत्रेणाद्युदात्तः। अङ्गति गच्छति प्राप्नोति जानाति वा स अग्निः वह्निः प्रसिद्धो वा। ''अञ्चु गतिपूजनयोः अग अगि इण इत्येते गत्यर्था धातवः सन्ति, एभ्यः सिद्धयत्यग्नि-शब्दः। गतेस्त्रयोऽर्थाः ज्ञानं गमनं प्राप्तिश्चेति, पूजनं नाम सत्कारः। योऽञ्चति पूज्यश्चास्ति, एतेन तस्य परब्रह्मणः परमेश्वरस्यापि नाम अग्निरस्ति''।

इति स्वामी दयानन्दः। अथ च- "अग्निः पृथिवीस्थानो देवः। अग्निः कस्माद् अग्रणीर्भवति, अग्रं यज्ञेषु प्रणीयते, अङ्गं नयति, सन्नममानः अक्नोपनो भवति- इति स्थौलाष्ठीविः। न क्नोपयति, न स्नेहयति, त्रिभ्य आख्यातेभ्यो जायत इति-शाकपूणिः। इतादन्ताद् दग्धाद्वा नीतात्। स खल्वेतेरकारमादत्ते, गकारमनक्तेर्वा दहतेर्वा नीः परः"। इति महर्षिर्यास्कः। अग्निरग्रणीति ब्राह्मणानामपि सन्ति वचांसि। स यदस्य सर्वस्या-ग्रमसृज्यत तस्मादग्निरग्निर्ह वै तमग्निरित्याचक्षते परोक्षम्। यद्वा एनमेतदग्रे देवानामजनयत तस्माद-ग्निरग्निर्ह नामैतद यदग्निरिति एवं बहुविधं प्रत्येकस्य शब्दस्य निर्वचनं तत्सर्वमेवानवद्यम् निर्वचनशब्दस्य निश्चयार्थकत्व प्रतिपादनात्। यथा च धन्वन्तरिः निश्चितं वचनं निर्वचनम्। यथायुर्विद्यतेऽस्मिन्ननेन वायु-र्विन्दती-त्यायुर्वेदः। वैदिकवाङ्मये विशेषतश्च ब्राह्मणग्रन्थेषु-अग्निः आत्मा, ब्रह्म , प्राणः , पुरुषः , प्रजापतिर्वा कथ्यते।

व्रतपते! - व्रतानां पतिः षष्ठी-तत्पुरुषः। अत्र सर्वपक्षविपक्षं परिहरन् आमन्त्रितस्य च इति सूत्रेण सर्वनिघातत्वमस्य सम्पन्नम्। स्वरितात्संहितायामनु-दात्तानामिति एकश्रुतिः। अग्निर्हि व्रतपतिरिति वेदे वैदिकवाङ्मये च बहुत्र उपलभ्यते। अग्निर्वै देवानां व्रतपतिः। अग्निर्वै देवानां व्रतभृत्। अग्ने धृतव्रताय। अग्ने व्रतपास्त्वे। त्वमग्ने व्रतपा असि । व्रतम्- व्रियते स्वीक्रियते येन यद्वा। वृञ्+अतच्। पृषिरञ्जिभ्यां कित् अन्येभ्योऽपि दृश्यन्ते। औणादि प्रत्ययः कित्त्वाद् गुणनिषेधः। यणादेशः। चित्त्वादन्तोदात्तत्वम्। अथच-व्रतमिति कर्मनाम, निवृत्तिकर्म वारयतीति सतः। इदमपीतरद् व्रतमेतस्मादेव वृणोतीति सतः। अन्नमपि व्रतमुच्यते यदावृणोति शरीरम्। सत्यमेव व्रतस्य रूपमिति च ब्राह्मणम्- एतत् खलु व्रतस्य रूपं यत्सत्यम्। एतद्ध वै देव व्रतं चरन्ति यत्सत्यम् । अग्निहोत्रं वावव्रतम्। वीर्यं वै व्रतम्। श्रीर्वै व्रतम् ।

चरिष्यामि - चर धातोर्लृटि उत्तम पुरुषैक वचनस्य रूपमिदम्। तिङ्ङ्तिङः इति निघाते स्वरितप्रचयौ। तत् - तनुते विस्तृतो भवतीति तद् ब्रह्म नामैतद्। त्यदादित्वात् सर्वनाम। तन्+अदि औणाहिकि प्रत्ययः। प्रत्ययस्वरेणाद्युदात्तत्वादन्तोदात्तः। यद् वा प्रातिपदिक-त्वेनान्तोदात्तः। शकेयम्- शक्नुयाम्। शक्लृ धातोर्विधिलिङि-उत्तम-पुरुषैकवचने रूपमिदम्। स्वादिगणस्थो धातुरयं कथं शकेयमिति। व्यत्ययो बहुलमितिसूत्रेण विकरणव्यत्ययः। तिङ्ङःतिङ इति निघातस्वरः। मे-तेमयावेकवचनस्य इतिसूत्रेण द्वितीया चतुर्थीषष्ठीस्थस्य अस्मद एकवचनस्य 'मे' इति आदेशः स च नित्यानुदात्तः। राध्यताम्- संसेध्यताम्। पूर्यतामिति। राधृधातोर्लोटि आत्मनेपदस्य प्रथम-पुरुषैकवचनस्य रूपम्। अत्र व्यत्ययेन श्यन्। निघातस्वरः। संहितायामेकश्रुतिः। इदम्-इन्दति परमैश्वर्यहेतुर्भवतीति इदम्। प्रत्यक्षविषय-बोधकः सर्वनामसंज्ञो वा। इदि+कमि इन्देः कमिर्निलोपश्च

इत्यौणादिक प्रत्ययः। प्रत्ययस्वरेण प्रातिपदिक-स्वरेणापि चान्तोदात्तत्वम्। इदम् इति उदक-नाम। इणोदमिक् 'इति श्री भोजदेवः। ईयते गम्यते बोध्यते येनेति वा। यद्वा इन्धेः कमिः, बाहुलकान्नलोपो धकारस्य च दकारः। इन्धते दीप्यत इति-इदम्।

अहम्-अस्यति प्रक्षिपति निराकरोति-अन्यामिति अस्मद् सर्वनाम वाचको वा। अस्+मदिक् युष्यसिभ्यां मदिक् इति मदिक् प्रत्यये अस्मद् शब्दः प्रत्यय स्वरेणान्तोदात्तः प्रातिपदिकस्वरेणापि चान्तोदात्त एव। ततः सौ परतः ''त्वाहौसौ'' इति अहआदेशे डे. प्रथमयोरम् इति विभक्तेरम् कृते शेषे लोपः इति लोपे कृते एकादेशे अहम् इति। अनुदात्तस्य च यत्रोदात्तलोप इत्यनेनान्तोदात्तत्वमेव।

अनृतात् - न ऋतम् अनृतम् इति नञ् समासः। समासस्य इति अन्तोदात्तत्वे प्राप्ते तत्पुरुषे तुल्यार्थ तृतीयासप्तम्युपमानाव्ययद्वितीया-कृत्याः इति सूत्रेण पूर्वपदप्रकृति स्वरः। यद् वा न विद्यते ऋतं यस्मिन्निति बहुव्रीहिः बहुव्रीहौ प्रकृत्या पूर्वपदम् इति पूर्वपद प्रकृतिस्वरः। नञ् उपसर्गत्वादुदात्तः। सत्यम्- अस्तीति यत्। अस्+लट्, लटः शतृ, अस्+अत् शतरि प्रत्यये श्नसोरल्लोपः। सर्वदा विद्यमानं प्रलयेऽपि नाशाभावात्। सत्सु भवं सत्यम् भवेश्छन्दसि इति यत्। यद्वा सत्सु साधुः तत्र साधुः इति यत्। सतोऽर्हमिति वा छन्दसि च इति यः। यतोऽनावः इत्याद्युदात्तत्वे प्राप्ते उञ्छादेराकृति- गणत्वात् सत्यादशपथे इति अन्तोदात्तत्वनिपातनाद्वा इष्टस्वरसिद्धिः। सत्यम् इति उदकनामसु पठितं निघण्टुषु। कर्मणि सत्यार्थे च पठ्यते नामानुक्रमणिकायाम्। सत्यम् निर्वचन् लिखति यास्कः- सत्यं कस्मात् सत्सु तायते सत्प्रभवं भवतीति वा। देवो धर्मो वा सत्यमिति ब्राह्मणम्- द्वयं वा इदं न तृतीयमस्ति सत्यञ्चैवानृतं सत्यमेव देवा अनृतं मनुष्याः, इदमहमनृतात्सत्यमुपै-मीति तन्मनुष्येभ्यो देवानुपैति । सत्यसंहिता वै देवाः। सत्यमया उ देवाः। सत्यं वा ऋतम्। ऋतमिति सत्यमेतत्। यो धर्मः सत्यं वै तत् तस्मात्सत्यं वदन्तमाहुर्धर्मं वदतीति धर्मं वा वदन्तं सत्यं वदतीति। सत्यं वै सुकृतस्य लोकः। तद्यत् सत्यं त्रयी सा विद्या। नामरूपे सत्यम्। सत्यशब्दस्य निर्वचनं ब्राह्मणग्रन्थेष्वपि प्राप्यते-तदेतत् त्र्यक्षरं सत्यमिति। स इत्येकमक्षरं तीत्येक मक्षरम् अमित्येकमक्षरं प्रथमोत्तमे अक्षरे सत्यं मध्यतोऽनृतं तदेतद् अनृतं सत्येन परिगृहीतम्।

सत्यमेव व्रतं, सत्यमेव धर्मः, सत्यमेव त्रयी विद्या इति तु सर्वं समीचीनमेव परं सत्यधर्मानुष्ठानेन-आचरणेन को लाभः ? किमर्थमिदं व्रतं स आचरतीति प्रश्नः? तम् समादधति ब्राह्मणानि-परब्रह्मणः प्रजापतेराज्ञा- अतिक्रमणान्मानुषभावाद् आज्ञापालन-रूपं देवभावमाप्नोति। नैव देवाः (प्रजापतेराज्ञाम्) अतिक्रामन्ति। न पितरो न पशवो मनुष्या एवैकेऽतिक्रामन्ति तस्माद् यो मनुष्याणां मेद्यति-अशुभे मेद्यति। विहूर्च्छति हि न ह्ययनाय च न भवत्यनृतं हि

कृत्वा मेद्यति। इदमहमनृतात्सत्य-मुपैमीति तन्मनुष्येभ्यो देवानुपैति। स वै सत्यमेव वदेत्। सत्याचरणेन मानवो यशस्वी भवति। एतद्ध वै देवानुपैति। स वै सत्यमेव वदेत्। सत्याचरणेन मानवो यशस्वी भवति। एतद्ध वै देवा व्रतं चरन्ति यत्सत्यं तस्मात्ते यशो यशो ह भवति य एवं विद्वान् सत्यं वदति। धर्माचरणेन सत्यभाषणेन वा तेजस्वी भवति श्रेयान् भवति, अनृताचरणेन च तद् विपरीतं गच्छति- एतावतैव स अनृतं विहाय सत्यं वदति धर्मं वा आचरति। स यः सत्यं वदति यथाऽग्निं समिद्धं तं घृतेनाभिषिञ्चेदेवं हैनं व उद्दीपयति तस्य भूयो-भूय एव तेजो भवति श्वः श्वः श्रेयान् भवति। अथ योऽनृतं वदति यथाऽग्निं समिद्धं तमुदकेनाभिषिञ्चेदेवं हैनं स जासयति तस्य कनीयः कनीय एव तेजो भवति श्वः श्वः पापीयान् भवति तस्मादु सत्यमेव वदेत्। सत्यव्रतेन मानवो दीक्षितो भवति, दीक्षां श्रद्धां वा प्राप्नोति यतोहि धर्मे सत्याचरणे दीक्षा प्रतिष्ठिता वर्तते। स यः सत्यं वदति स दीक्षितः। सत्ये ह्येव दीक्षा प्रतिष्ठिता भवति। सत्ये श्रद्धा प्रतिष्ठिता इति तु साक्षाद् भगवान् वेदः- दृष्वा रूपे व्याकरोत् सत्या नृते प्रजापतिः। अश्रद्धामनृतेऽदधा-च्छ्रद्धां सत्ये प्रजापतिः। व्रतेन दीक्षया वा दक्षिणा-दक्षता-कर्मकौशलं प्राप्यते-व्रतेन दीक्षामाप्नोति दीक्षया-प्नोति दक्षिणाम्। ऋतं सत्यञ्च प्राप्य स्वीकृत्य व्यक्तिर्दीक्षितो भवति यतो हि ऋतं सत्यमेव दीक्षा। ऋतं वाव दीक्षा सत्यं दीक्षा। यदा व्यक्तिर्दीक्षितो भवति तदा तस्य व्यवहारो देवानामिव भवति यदि हि स क्रुध्यति तर्हि स व्रतं हिनस्ति अव्रत्यो भवति मिथ्या करोति। अथ यद् दीक्षितः। अव्रत्यं वा व्याहरति क्रुध्यति वा तन्मिथ्या करोति व्रतं प्रमीणात्य क्रोधो ह्येव दीक्षितस्याऽग्निर्वै देवानां व्रतपतिस्तमेवैतदुपधावति त्वमग्ने व्रतपा असि देवआ मर्त्येष्वा। त्वं यज्ञेष्वीड्यः इति तस्यो हैषा प्रायश्चित्तिस्तथो हाऽस्यैतन्न मिथ्याकृतं भवति न व्रतं प्रमीणाति तस्मादाह त्वमग्ने व्रतपा असि देव आ मर्त्येष्वा। दीक्षासम्पन्नो विष्णुर्भवति विष्णुरिव भवतीति। यदह दीक्षते तद् विष्णुर्भवति। य व्रतं प्राप्य देवानुपैति स देवानामन्यतमो भवति-देवान् वा एष उपावर्तते यो दीक्षते स देवतानामेको भवति। व्रताचरणेन देवा विद्वांसो ब्राह्मणाा वा प्रीणन्ति तस्य हवींषि स्वीकुर्वन्ति, अव्रतिनां मानवानां नैव। न ह वा अव्रतस्य देवा हविरश्नन्ति। सत्यव्रती सत्यवादी दीक्षित एव व्यक्तिः स्वीयं सत्यव्रतमुद्दिश्य उद्घोषते यन्मम सत्यव्यवहार एव मां सर्वतः सर्वतोभावेन च रक्षतु-सा मा सत्योक्तिः परिपातु विश्वतः। ईदृशं सत्यव्रतिनं मानवं तस्य प्राणो ब्रह्म वा उत्तमं लोकं प्रापयति। प्राणो ह सत्यवादिनमुत्तमे लोक आदधत्।

उपैमि-उप+एमि। प्राप्नोमीति भावः। उपसर्गत्वाद् उप आद्युदात्तः। एमि एत्यत्र तिङ्ङतिङ इति निघात स्वरः। एकादेशे कृते स्वरित एव भवति।।1।।5।।

**प्रवक्ता संस्कृतविभागः**

**राजकीय स्नातकोत्तर महाविद्यालयः सिरोही,**

**राजस्थानम्-३०७००१**

# सोरठासौष्ठवम्

❑ प्रो. अभिराज राजेन्द्र मिश्रः
( कुलपतिचरः )

## आत्मदशकम्

नाम्नाऽस्म्यहमभिराज उदिततरणिरज्ञाननिशि।
मामाश्रयतु समाज ऋतसत्यप्रथितोऽथ भुवि।। 1।।

नो विहितान्येनांसि मया क्वापि बोधेन सह।
विहितान्येव तपांसि कविकर्मणि निरतेन ननु।। 2।।

मनसा वचसा चाऽपि चिन्तितमहितं नो किमपि।
कस्याप्यहो कदाऽपि स्मृतिपथमेति न तदपि लघु।।3।।

प्राक्शयनान्निशि नित्यमहमहीन-चरितं हृदि।
उचिताऽनुचिमहृद्यहृद्यमथो विमृशामि किल।। 4।।

विमल खनिभमुद्वीक्ष्य निजाचरणपरिधिं मनसि।
चरितं स्वयं समीक्ष्य परितोषं गच्छाम्यतनु।। 5।।

गोढूं कश्शक्तोऽस्ति निजपापानि निजादिह।
शास्त्रे तत उक्तोऽस्ति हरिरात्मनि सततं वसति।।6।।

पापान्येव निगूह्य छलवञ्चनविधिनेह भुवि।
निजसत्येन विमुह्य जनो महामान्यो भवति।। 7।।

नोद्घाट्यते यदीह पापं वा वञ्चनमपि।
भवति जनो महनीय उत्तम एव मतस्सदसि।। 8।।

पापघटं पश्यामि जन पुण्यकञ्चुकमिह।
ज्ञायन्ते दुरितानि यावत्तावत् कुशलमिव ।। 9।।

हृदि स्थितं हरिमेव वीक्ष्य न कस्य भयं भवति।
अनुभवन्तु नु तदेव सर्वमन्यदिह परमलघु।। 10।।

## वसन्तागमः

वनभुवि लसति वसन्त उडुपतिरिह नीले नभसि।
आलक्ष्यते नु हन्त विविधसमृद्धिसमृद्ध इह।। 2।।

लोहितमहो पलाशविपिनमखिलमतिसुभगतनु।
यथा वधूपरिहासमहितमुदयभवनं किमपि।। 2।।

मधुककुसुमसमुदाय इह निपतति भिन्नेऽप्यहनि।
मुक्ताफलसमवाय उज्ज्वलकान्तिरिवार्द्रभुवि।। 3।।

इन्दिन्दिर निकुरम्बमुपरि समुड्डयते वियति।
मधुकंकुसमपरिरम्भपानकुतूहलि दिशि दिशि।।4।।

कूजत्यधिसहकारविटपमयं पिकसंघ इह।
प्रकृतमिमं संसारमन्यमिवैव करोति किल।। 5।।

यावन्त्येव सुमानि रूपाण्यपि तावन्ति किल।
मादकगन्धमयानि को नु पृथक्तद् गणयति।। 6।।

पीहु-पीहुरिति हन्त चीत्कुरुते चातक इह।
धन्यस्त्वमिह वसन्त! तव सुहृदोऽत्र न कति कति।।7।।

परिमण्डलं विधाय मधुलम्पट इह दिशि-दिशि।
इन्दिन्दिरसमवाय उन्मद आहिण्डति सपदि।। 8।।

तित्तलिकाः सम्भूय दिशि-दिशि सञ्चरणं दधति।
कुसुममधूनि निपीय सविलासं रतिमादधति।। 9।।

जयसि जयसि ऋतुराज ! समुपगते सहसा भवति।
परिवर्तितस्समाज उद्भिज्जानां विपिनभुवि।। 10।।

## अयि मम भारतदेश

अयि मम भारतदेश ! धृतमस्तकहिममणिमुकुट।
स्वर्गोपमपरिवेश ! जलधित्रयलालितचरण।। 1।।

सम्भावितबदरीश ! सरलदेवतरुरोममय।
भारतराष्ट्रगिरीश ! जयसि त्वमपि नगोत्तम।। 2।।

भागीरथि ननु देवि ! महिमा ते प्रसृता जगति।
सलिलं हरिपदसेवि मुक्त्यर्थं प्रभवति जगति।। 3।।

अयि कृष्णे कावेरि गोदावरि यमुने जननि।
सलिलं पातकवैरि ननु पुनाति राष्ट्रं मम।। 4।।

सुस्नातका भवाम वयमिह गङ्गे पयसि तव।
उत्सङ्गे विहराम मुक्तिसुखान्यनुभवितुमिह।। 5।।

सनराइज विला,
लोअर समर हिल,
शिमला

# ।। सकारादि-सीताशतनाम।।

❑ श्रीकृष्ण दाधीच

सीता सत्यव्रता साक्षी सत्यनिष्ठापरायणा।
सर्वकार्यनियन्त्री सा सुरूपा सर्वगोचरा।।

सर्वान्तःस्था च सावित्री स्वयंभूतिः सनातनी।
संसारसारा सर्वविदा सुकीर्तिः सूर्यसंस्थिता।।

स्वकार्या सर्वकार्या च सिद्धिः सौख्या सुशोभना।
सुदर्शना स्वधा स्वाहा सर्वयोगेश्वरेश्वरी।।

सरस्वती सर्वविद्या स्वरा सर्वार्थसाधिका।
सर्वेश्वरी सुलिलता सर्वेप्सितप्रदायिनी।।

सर्वशक्तिविनिर्युक्ता सर्वशक्तिप्रदायिनी।
सर्ववादाश्रया सांख्या सुसूक्ष्मपदसंश्रया।।

सुभद्रा सुरभिःसंध्या सर्वदा सर्वसाक्षिणी।
संसारतारिणी सिद्धा सर्वप्रत्ययकारिणी।।

सर्वेन्द्रियमनोमाता सर्वेन्द्रियमनोगता।
सत्क्रिया सेविता सेव्या सुमंत्रा सर्वदायिनी।।

सर्वप्रहरणोपेता सहस्त्ररिपुनाशिनी।
सहस्त्रश्मिपद्मस्था सुद्युम्ना सत्परायणा।

सीरध्वजसुता सर्वा सत्प्रतिष्ठा सुराश्रया।
सत्यमात्रा सत्यसंधा सरोजनयनासना।।

सर्वेश्वरप्रिया साध्या सर्वभूतहृदि स्थिता।
सर्ववर्णात्मिका सौम्या सिंहस्था सिंहवाहिनी।।

संकल्पसिद्धा साम्यस्था सर्वविज्ञानदायिनी।
संजीवनी सुकृतिः समुद्रान्तरवासिनी।।

स्थानेश्वरी सिनीवाली सागरान्तरवासिनी।
सर्वातिशायिनी सैका सुसौख्या सर्वमंगला।।

सर्वदेवस्तुता सेना सर्वदेवनमस्कृता।
सुकीर्तिः सुखदा सीमा सुगंधा सिन्धुपारगा।।

सरोजनिलया संख्या समुद्रपरिशोषिणी।
सुदुर्लभा सृष्टिकर्त्री सृष्टिस्थितिविनाशिनी।।

सुसौख्या सर्वतोभद्रा समीक्षा सर्वतोमुखी।
सरसिजाक्षप्रिया सत्ता सर्ववर्णाशयस्थिता।।

संकर्षणा सती साध्वी सीरध्वजकुलोद्भवा।
अष्टोत्तरशतं नाम्नां सीतानुग्रहकांक्षया।।

टीकमेन स्तुता माता साक्षाज्जनकनन्दिनी।
आरोग्यं भूतिमायुं च ददात्येषा मतिर्मम।।

मुरलीपुरा, जयपुर

# वैयाकरणस्य समसनवैदुष्यम्

❑ डा. सुरेन्द्रकुमारशर्मा

शब्दशास्त्रैकधियो हि वैयाकरणाः सूत्रादिष्वर्थगतं समसनं विधाय चमत्कुर्वन्ति विद्वद्धौरेयान् विविध-शास्त्रपारङ्गतान्। अस्मिन् हि विषये वाक्यशास्त्रविदो मीमांसकाः प्रमाणशास्त्रवेत्तारश्च नैयायिका अपि विमुह्यन्ति। स्वकीयैर्नानाविधैस्तर्कैस्तर्क्यमाणास्ते वैयाकरणीं वैदुषीमेव प्रकारान्तरेण स्वविद्यायां निगूह्य प्रकटीकुर्वन्ति भिन्नरूपेण। अस्मादेव च कारणात् वैयाकरणा एव बुधा इति उच्यन्ते शास्त्रज्ञैः। ये पुनः पदवाक्यप्रमाणज्ञा भवन्ति तेषां वैदुष्यं तु परमाद्भुतं भवत्येव। जयपत्तनीयवैयाकरणेषु स्वामिबालानन्द-महाभागानां न केवलं पदशास्त्रविज्ञत्वमपितु वाक्य-शास्त्रस्य प्रमाणशास्त्रस्य चाप्यभिज्ञत्वं अत्यद्भुतमासीत्। अमीभिः समासप्रकरणस्योदाहरणानामेकत्र संस्थितिः पदशास्त्रीयक्रमेणापि वाक्यशास्त्रीयतात्पर्यबोधान्वित-अवधानपूर्वकं एकस्मिन्नेव लेखे रूपान्तरिता। शब्दशक्ती-नामनुक्रमेणापि शब्दबोधस्य सौकर्ये विद्वद्भिरमीभिः पर्याप्तमवधानं रक्षितम्। तच्चात्र प्रस्तूयते-

**पञ्चराजम्। कृष्णाश्रितः। दुःखातीतः। ग्रामगमी। अन्नबुभुक्षुः। स्वयंकृतिः। खट्वारूढो जाल्मः॥ १॥**

**सामिकृतम्। मासप्रमितः। मुहूर्त्तसुखम्। शंकुला-खंडः। धान्यार्थः। मासपूर्वः। मातृसदृशः॥ २॥**

**पितृसमः। माषोनम्। माषविकलम्। वाक्कलहः। आचारनिपुणः। गुडमिश्रः। आचारश्लक्ष्णः॥ ३॥**

**गुडसंमिश्रः। माल्याम्बरः। हरित्रातः। नखभिन्नः। खनिर्भिन्नः। वातच्छेद्यम्। काकपेया ॥ ४ ॥**

**दध्योदनः। गुडधानाः। यूपदारुः। द्विजार्थः। द्विजार्थाः। द्विजार्थम्। भूतबलिः ॥ ५॥**

**गोहितम्। गोसुखम्। चोरभयम्। वृकभीतः। सुखापेतः। कल्पनापोढः। चक्रमुक्तः ॥ ६॥**

**स्वर्गपतितः। तरङ्गादपत्रस्तः। स्तोकान्मुक्तः। अल्पा-न्मुक्तः। अन्तिकादागतः। अभ्याशादागतः॥ ७॥**

**दूरादागतः। विप्रकृष्टादागतः। कृच्छ्रादागतः। राजपुरुषः। ब्राह्मणयाजकः। देवपूजकः ॥ ८॥**

**सर्वश्वेतः। सर्वमहान्। इध्मव्रश्चनः। नृणां द्विजःश्रेष्ठः। सर्पिषो ज्ञानम्। सतां षष्ठः॥ ९॥**

**काकस्य कार्ष्ण्यम्। ब्राह्मणस्य शुक्लाः। फलानां सुहितः। ब्राह्मणस्य कर्त्तव्यम् ॥ १०॥**

**स्वकर्त्तव्यम्। तक्षकस्य सर्पस्य। राज्ञां मतः। इदमेषा-मासितम्। गवां दोहोऽगोपेन। आपोन्म्रष्टा॥ ११॥**

**व्रजस्य भर्ता। अन्वेजस्य पाचकः। भूभर्त्ता। भवतःशायिका। उद्दालकपुष्पभञ्जिका॥ १२॥**

**दन्तलेखकः। पूर्वकायः। अपरकायः। मध्याह्नः। सायाह्नः। अर्धपिप्पली ॥ १३॥**

**द्वितीयभिक्षा। प्राप्तजीविकः। जीविकाप्राप्तः। आपन्नजीविकः। प्राप्तजीविकः ॥ १४॥**

**मासजातः। द्व्यहजातः। द्व्यह्नजातः। अक्षशौण्डः। सांकाश्यसिद्धः। भानूपशुष्कः ॥ १५॥**

**स्थालीपचाः। चक्रबन्धः। तीर्थध्वाङ्क्षः। मासे देयम्। पूर्वाह्णे ज्ञेयम्। अरण्ये तिलकाः ॥ १६॥**

**वने कशेरुकाः। पूर्वाह्णकृतम्। अपररात्रकृतम्। तत्रभुक्तम्।। अवत भुक्तम्। पात्रेसमिताः ॥ १७॥**

**गेहे शूरः। गेहेनर्दी। परमा पात्रेसमिताः। स्नातानुलिप्तः। एकनाथः। सर्वयाज्ञिकाः ॥ १८॥**

**जरन्नैयायिकाः। पुराणमीमांसकाः। नवपाठकाः। केवलवैयाकरणाः ॥ १९॥**

**प्राचार्य :**
श्री दादू आचार्य संस्कृत महाविद्यालयः, जयपुरम्

# अपूर्णा संस्कृतं विना वर्तमानशिक्षा

❑ अंजना शर्मा

अमृतोपलब्धिं विना समुद्रमथनं विचारस्वातन्त्र्यं विना जनतन्त्रं यथा व्यर्थं तथैवापूर्णा व्यर्था वा वर्तमानशिक्षा संस्कृतं विना।

सर्वे मनीषिणो विदन्ति यद् राष्ट्रं कर्तव्यनिष्ठं समृद्धं स्वसंस्कृतिसम्पन्नं सुरक्षितं समाजञ्च समुन्नतं विधातुमेव शिक्षाया आवश्यकता भवति।

एतदपि सर्वविदितमेव यदधुना केवलं वर्तमान-शिक्षणशिक्षिता जना निरङ्कुशा उच्छृंखला दुर्व्यसनिनः सप्रमादाश्च दरीदृश्यन्ते। अनेके दोषाश्च तानाक्रमन्ति। दोषाक्रान्ताश्च ते राष्ट्राहितकृत्कर्माणि विदधति। पाश्चात्यवेषभूषाभाषासभावतानुरक्तास्ते स्वपूर्वजाना-मृषीणा त्यागपूर्णं चरित्रं विस्मृत्य कुपथमाश्रयन्ते।

एतादृशेभ्यो जनेभ्यः संस्कृतमेव सदाचरणवि-शिष्टकर्तव्यशिक्षां प्रदातुं क्षमते। देववाण्या वङ्मये जीवनयात्राया विभिन्नविभागानामानुरूप्येणैव नैकः विभिन्नाः शाखाश्च वर्तन्ते।

सभ्यसमाजस्य प्रत्येकावश्यकतानुसारमेव तास्ता विद्याः कलाश्च समुद्दिश्य संस्कृतवाङमयं प्राक्प्रवृत्त-मासीत्। आसीत् समाजस्य राष्ट्रस्य वा सर्वेष्वप्यङ्गेषु समाना कल्याणबुद्धिः प्राचीनानामाचार्याणां शिष्टानां जनतायाः पुरोयायिनाञ्च अतएव तत्र तत्र पुराणादिषु लिखितम्-

**''पठन् द्विजो वागृषभत्वमीयात्**
**स्यात् क्षत्रियो भूमिपतित्वमीयात्।।**
**वणिग् जनः पण्यफलत्वमीयाज्**
**जनश्च शूद्रोऽपि महत्वमीयात्।।**

**वाल्मीकिरामायणे**

**शृण्वन्विप्रो वेदवित्स्यात् क्षत्रियः पृथिवीपतिः।**
**ऋद्धिं प्राप्नोति वैश्यश्च शूद्रश्चारोग्यमृच्छति।।**

**आग्निपुराणे**

नैवास्त्यस्माकं कश्चन विरोधो वर्तमानशिक्षया सह परं वयं वाञ्छामो यत्पूर्वं कर्तव्यशिक्षाप्रदं संस्कृतमधीत्य ततः परमन्यविद्यामधीयेरन् सर्वे।

अस्माकं मते तु वर्तमानशिक्षा विषमस्ति, परं संस्कृतममृतमेव। एतदपि सर्वे जानन्ति यद्विषग्रहणं कल्पते मृत्यवे। परं विषस्य रूपान्तरितत्वे भेषजत्वाद् ग्रहणे न हि काचन हानिः।

अतो वर्तमानशिक्षाग्रहणात्प्रागेव संस्कृतभेषजं गृहीत्वा संस्कृतामृतं निपीय वा वर्तमानशिक्षाविषमपि गृह्णीयात्तर्हि विषमप्यमृतं भवेद् ध्रुवम्।

भारतस्य स्वातन्त्र्यरक्षायै भारतीयसंस्कृतिसंरक्षणं प्रथमावश्यकं वर्तते। भारतीयसंस्कृतिसंरक्षणञ्च संस्कृताध्ययनेन विना सर्वथाऽसंभवमिति दृष्ट्यापि मतमेतत् परिपुष्यते यद् ''अपूर्णा संस्कृतं विना वर्तमानशिक्षा, इति।''

**विभागाध्यक्षा ( दर्शन विभागः )**
**श्री दादू आचार्य संस्कृत महाविद्यालयः,**
**जयपुरम्**

# संयुक्तपरिवारे कर्त्तव्यनिष्ठता रामायणकालसन्दर्भे

❑ स्वाति जैन

कुटुम्बो वा परिवारो वा समस्तमानवीयसंघटनानाम् आदिमं सोपानम् अस्ति तथा मानवीयोन्नते: प्रथमचरणम्। समाजस्य इकाईरूपेण परिवार: तासां परम्पराणां भावनानाञ्च आचारविचाराणाञ्च मानवमनसि आत्मसातं करोति। वाल्मीकि: प्राचीनादर्शाणां विषये मानवान् शिक्षयति यत् सर्वेषां संस्काराणां तथा च परम्पराणां पालनं मानवै: करणीयमेव।

परिवारस्य सामूहिकहितरक्षणाय सर्वै: सह सम्माननीय स्नेहमयव्यवहाराय सर्वै: व्यक्तिगतस्वार्था: उपेक्षणीया:।

कुटुम्बस्य संघटनाया: उद्देश्यमासीद्यत् सर्वेऽपि कुटुम्बिन: एकस्य गृहप्रमुखस्य आदेशान् स्वीकुर्युरिति।

पारिवारिकरूपं नि:सन्देहं पैतृकमासीत्। परिवारे पिता कुटुम्बस्य प्रमुख: अभवत्, यस्य आदर्शा: सर्वै: स्वीकर्त्तव्या: आसन्। पत्नी यद्यपि गृहस्वामिनी आसीत् किन्तु गृहस्वामिन: आश्रिता, आज्ञाकारिणी च मर्यादिता भवति स्म। सर्वेषां पुत्र-पुत्रीणामुपरि पितु: पूर्णनियन्त्रणमासीत्, येन तेषां योग्यजीवननिर्माणं भवेत्। पितु: अनुमतिं विना पुत्रा: स्वजीवनस्य अर्धांगिन्या: चयनं न कुर्वन्ति स्म। यथा धनुर्भङ्गं कृत्वा सीताप्राप्त्यधिकारी राम: पितुराज्ञां विना विवाहप्रस्तावं न स्वीकृतवान्।

**दीयमानां न तु तदा प्रतिजग्राह राघव:।**
**अविज्ञाय पितुश्छन्दमयोध्याधिपते: प्रभो।।**

**( वाल्मीकि-रामायणं २/११८/५१ )**

व्यावहारिककार्येष्वपि पितुराज्ञा सर्वोपरि भवति स्म। पिता स्वसम्पत्ते: स्वेच्छानुसारं विभाजनं कर्तुं शक्नोति स्म। यथा दशरथेन कैकयीपित्रे इदं वचनं प्रदत्तं यत् कैकयीपुत्र एव कौशलनरेश: भविष्यति। कौशल-राज्यस्य उत्तराधिकारी भविष्यति।

**पुरा भ्रात: पिता न: स मातरं ते समुद्वहन्।**
**मातामहे समाश्रौषीद्राज्यशुल्कमनुत्तमम्।।**

**( २/१०७/३ )**

यदा भरत: रामं कौशलराज्यस्य सम्राट पदं स्वीकर्तुं प्रार्थितवान् तदा राम: अपि उक्तवान्-

**वने वा चीरवसनं सौम्यकृष्णाजिनाम्बरम्।**
**राज्ये वाऽपि महाराजो मां वासयितुमीश्वर:।।**

**( २/१०१/२० )**

महाराज दशरथोऽपि स्वराज्यसभायां गर्वपूर्वकमेतत् उद्घोषितवान् यत् प्रजानां रक्षायै जागरूको भूत्वा मयाऽपि मम पूर्वजानां परम्पराया: पालनं कृतम्। मयाऽपि तेषां मार्ग: अनुसृत:।

**मयाप्याचरितं पूर्वै: पन्थानमनुगच्छता।**
**प्रजा नित्यमनिन्द्रेण यथा शक्त्यभिरक्षिता:।।**

**( २/२/६ )**

तथा राम: वनगमनाय अनुमतिं स्वीकर्तुं स्वमात्रेऽपि एतदेव तर्कं प्रदत्तवान्-पितुराज्ञां पालनं कृत्वा अहं पूर्वजेभ्य: धर्मात्मपुरुषेभ्य: अनुसृतं मार्गम् एव अनुसरामि।

**पूर्वैरयमभिप्रेतो गतो मार्गोऽनुगम्यते।**

**( २/२१/३६ )**

तथैव अपरत्र यदा कैकय्या इक्ष्वाकुकुलकल्याणस्य अवहेलनां कृत्वा स्वस्य तथा स्वपुत्रस्य व्यक्तिगत-स्वार्थेभ्य: महत्वं प्रदत्तं तदैव दशरथेन स्वस्य उच्चकुलस्योपरि आगामिन्या: घोरविपत्ते: सम्भावना ज्ञाता।

**इच्छ्वाकूणां कुले देवि सम्प्राप्तः सुमहानयम्।**
**अनयो नयसम्पन्ने यत्र ते विकृता मतिः।।**

**(२/१२/१९)**

रामस्य वनवासस्य तथा भरतस्य राज्याभिषेकस्य दुराग्रहं कृत्वा इक्ष्वाकुपरिवारस्य प्रतिष्ठायामुपरि अपयशसः चन्दनं कृतवत्याः कैकय्याः आलोचना स्वकुलोपघातिनी कुलघ्नी कुलपांसनी इत्यादिभिः विशेषणैः जाता।

तथा कैकयीपुत्रः भरतः तत्स्वार्थपूर्णाग्रहं निर्मूलं कृत्वा एतत् कथितवान्–

**ज्येष्ठस्य राजता नित्यमुचिता हि कुलस्यनः।**

**(२/७९/७)**

अनेनैवं पारिवारिकसंघटने पितुरनन्तरं ज्येष्ठपुत्रः पितृतुल्यः सम्मानाधिकारी आसीत्। सः ''वंशकरः'' उच्यते।(१/३८/१२)

परिवारे पुत्रस्नेहस्य केन्द्रबिन्दुः शोभते।''आदर्श–तलसंस्थितं तथा नास्ति पुत्रसमः प्रियः '' इति एतदुदाहृतम्।२/७४/२४

पुत्रेष्वपि ज्येष्ठपुत्रस्य अधिकारयुक्तं स्थानं शोभते स्म वंशगतकारणेन तथा भावनात्मककारणेन ज्येष्ठो पुत्रः पितुः अधिकस्नेहपात्रो भवति स्म।

**प्रायेण हि नरश्रेष्ठज्येष्ठाः पितृषु वल्लभाः।**

**१/६१/१९**

**तेषां केतुरिव ज्येष्ठो रामो रतिकरः पितुः।**

**१/१८/२४**

उत्तराधिकारस्य नियमोऽपि ज्येष्ठपुत्राय एव विशेषाधिकारो प्रददाति। लघुभ्रातृभ्यः पूर्वं ज्येष्ठपुत्रस्य राज्याभिषेको भवति स्म।

**सततं राजपुत्रेषु ज्येष्ठो राज्याभिषिच्यते।**

**२/७३/२२**

ज्येष्ठभ्रातुः विवाहाय प्राथमिकता प्रदीयते स्म। तेन पूर्वविवाहकारिणः लघुभ्राता ''परिवेत्ता'' इत्युच्यते। लघुभ्राता अपि ज्येष्ठभ्रातरं पितृतुल्यमेव स्वीकुर्वन्ति स्म। तस्यादेशानां पालनां कुर्वन्ति स्म।यथा–

अ) यदा एकदा कुम्भकर्णः लङ्कायाः राजसभायां रावणं प्रति उपदिष्टवान् तदा रावणः कुम्भकर्णम् उत्तेजितवान् – **मान्यो गुरुरिवाचार्यः किं मां त्वमनुशाससे।६/६३/२३**

ब) भरतः ज्येष्ठानुवर्ती अर्थात् भ्रातुः आज्ञापालको स्मृतः। एवमेव ज्येष्ठभ्रातुरपि एवमेव कर्त्तव्यं आसीत् यत् सोऽपि लघुभ्रातृन् प्रति पुत्रतुल्यव्यवहारं कुर्यादिति। राजशासनसमये रामः सदैव लघुभ्रातृभ्यः परामर्शं गृहीतवान् आसीत्। तेभ्यः प्रसन्नतार्थं सदैव सच्चेष्टा क्रियते स्म।

पितृ शब्दः पा धातोः रक्षणार्थे व्युत्पन्नः। अत एव पिता संरक्षको विद्यते। पितृ पदस्य व्युत्पत्तिरेव पितुः उत्तरदायित्वं सूचयति यत् पिता सर्वदा स्वसन्ततीनाम् उपकाराय उद्यतो भवति स्म।

**यन्मातापितरौ वृत्तं तनये कुरुतः सदा।**
**न सुप्रतिकरं तत्तु मात्रा पित्रा यत्कृतम्।।**
**यथाशक्तिप्रदानेन स्वापोच्छादनेन च।**
**नित्यं च प्रियवादेन तथा संवर्द्धनेन च।।**

**२/१११/९-१०**

पितरौ अपि स्वसन्ततेः परमस्नेहभाजनौ आस्ताम्। यस्मिन् पुरुषे सन्तानस्य प्रादुर्भावस्य मूलं प्राप्यते। यः प्रत्यक्षं देवतुल्यः वर्तते। कोऽपि पुत्रः तादृशस्य पितुः विरोधं कथं कर्तुं शक्यते? मातुः पितुः च आज्ञापालनं पुत्रस्य सर्वाधिकरूपेण महत्वपूर्णं कर्त्तव्यम् उच्यते।

रामेण कथितं– ययोः सेवया धर्मार्थकामाप्तिः भवति, ययोः आराधनया तयोः पित्रोः त्रिलोकानां आराधना भवति तयोः तुल्यं पवित्रम् अस्मिन् सम्पूर्णसंसारे अन्यत्किमपि नास्ति।

वयं स्वमध्ये उपस्थितौ प्रत्यक्षदेवते पितरौ उपेक्ष्य यदि अप्रत्यक्षान् सहस्रमपि देवताः वयं पूजयामश्चेत्

तन्नोचितम्।

**निष्कर्षः** - पारिवारिकसदस्यानां सौहार्दमयः पारस्परिकसम्बन्धः एव आर्यसंस्कृतेः प्रधानसम्बलो तथा तस्योत्कृष्टतायाः प्रमुखं रहस्यम् आसीत्।

रामायणकारेण दशरथस्य पारिवारिकसदस्यानां मध्ये अत्यन्तस्नेहपूर्णाः एव सद्भावपूर्णाः सम्बन्धा दर्शिताः। यथा-पिता-पुत्रयोः भ्रातॄणां, पति-पत्न्योः भातृजाययो श्वश्रूवध्वोः इत्यादयः।

यथा १) दशरथरूपेण आदर्श पिता तथा रामरूपेण आदर्शपुत्रः चित्रितः।

२) प्रोष्ठपदोपमाः सूक्तेः अनुरूपं रामलक्ष्मणयोः तथा भरत-शत्रुघ्नयोः भ्रातृयुगलम्।

३) कैकय्याः ईर्ष्याभावनया स्वार्थपरायणतया अमर्यादिताचरणाच्च परिवारे विशृङ्खलता उत्पन्ना अभूत्।

तथा कैकय्याः एतस्मान् अभद्रव्यवहारात् प्राक् कौशल्यादिषु भगिनीवत् प्रेमव्यवहार आसीत्।

अनेन प्रकारेण वयं पश्यामः यत् मातुः पितुः च भक्तिः सन्तानप्रेम पति-पत्न्योरनुरक्तिः अतीतपरम्परासु आस्था तथा पूर्वजानां श्रद्धामयस्मरणम्- एते सुकुमारतन्तवः सन्ति ये परिवारे सर्वान् सदस्यान् परस्परं बध्नन्ति एव।

मनुष्यस्य चरित्रनिर्माणे कुटुम्बस्य महद्योगदानं भवति।

परिवार एव एतादृशः सुदृढ़ः शिक्षणालयः विद्यते यस्मिन् व्यक्तिः सामूहिककल्याणाय वैयक्तिकप्रवृतीन् तथा महत्वाकांक्षान् उपेक्ष्य स्नेहस्य, सौहार्दस्य, गृहं प्रति आदरभावस्य भक्तिभावस्य पाठं पाठयति वा शिक्षां शिक्षयति।

**शोधच्छात्रा**
**राष्ट्रिय-संस्कृत-संस्थानम्,**
**जयपुर-परिसरः, जयपुरम्।**

---

# गीतम्

❑ **परमानन्द शर्मा ''प्रमोद''**

मंगलं भवतु जीवनं गृहे गृहे।
विपन्मयी निशा प्रयातु जीवनात्।
सौख्यमयी विभा न यातु जीवनात्।।

अहर्निशञ्च मानवान् बोधयेम
स्वाचारेण सर्वदा भुवं जयेम।।
सत्यभाषणं भवतु नो मुखे मुखे।
मंगलं भवतु जीवनं गृहे गृहे।।

कोऽपि रुग्णो दीनहीनो मा भवेत्।
नित्यमेव माधवं केशवं जपेत्।।
शिवो विभूय शिवं मित्र ! अर्चयेत्।
कर्मकौशलेन नो भारतं जयेत्।।
राष्ट्रभक्तिभावना स्याज्जने जने।
मंगलं भवतु जीवनं गृहे गृहे।।

संगठने शक्तिः कार्यसाधिका
तत्त्वदर्शिनो वदन्ति एवमेव।
राष्ट्रकार्यसाधकाः भवन्तु रे
भेदभावनां विहाय सर्वदैव।।
भारतं हि प्रतिदिन यजामहे।
मंगलं भवतु जीवनं गृहे गृहे।।

**रा.उ.मा.वि. आगूँचा**
**(भीलवाड़ा)**

पुस्तकसमीक्षा

❑ म.म. देवर्षिकलानाथशास्त्री

# डॉ. रमाकान्तशुक्लाभिनन्दनग्रन्थः

राष्ट्रपतिसम्मानितेन, पद्मश्रीत्यलङ्करणसभाजितेन, विविधपदवीविभूषितेन, भारतीयसंस्कृतपत्रकार-संघाध्यक्षेण, ''अर्वाचीनसंस्कृतम्'' पत्रिकासंस्थापक-सम्पादकेन, ''भाति मे भारतम्'' प्रभृतिगीतिप्रस्तुति-भिरर्जितयशसा डॉ. रमाकान्तशुक्लेन साहित्य-संस्कृत-सेवासक्रियस्य स्वकीयस्यायुषः पादोनशताब्दी (75 वर्षाणि) सानन्दं सम्पूरितेति शुभावसरमभिनन्दयितुं दिल्लीमहानगरे महोत्सवा अप्यायोजिता:, अभिनन्दन-ग्रन्थरूपेण ''श्रीहीरकप्राभृतम्'' इति शीर्षकं बिभ्राणस्य विशालग्रन्थपूगस्य चत्वारः खण्डा अपि प्रकाशिता इति समधिगतैव स्यात् सूचना संस्कृतसेविभिः पत्र-पत्रिका माध्यमेन। 1940 ई. वर्षे लब्धजन्मनः शुक्लवर्यस्य सेयं ''हीरकजयन्ती'' अभिहिता समायोजकैरिति कृत्वा हीरकप्राभृतमिति नामकरणं विहितं स्याद् ग्रन्थमालाया अस्याः।

प्रसङ्गेनानेन स्मारिता पञ्चवर्षपुरातन्येका घटना यदा विद्वत्समाजे सेयं चर्चा प्रासरद्यत् देशेऽस्माकं स्वर्णजयन्ती हीरकजयन्तीत्याद्युत्सवानां परम्परा कदा प्रारभत। पाश्चात्येयं परम्परा यत् 25 वर्षपूर्तेरभिनन्दनं सिल्वर-जुबिलीति संज्ञामनुसृत्य रजतजयन्तीरूपेण क्रियते, 50 वर्षपूर्तिः गोल्डन जुबिली संज्ञानुसारं सुवर्णजयन्ती-त्यभिधीयते, 60 वर्षपूर्तिः डायमंड जुबिलीतिसंज्ञानुसारं हीरकजयन्तीत्यभिधीयते, 75 वर्षपूर्तिः प्लैटिनम जुबिलीत्यभिधीयते अतस्तस्याः कृते का संज्ञा स्यात्? बहुभिः ''अमृतमहोत्सव'' इत्यभिहिता सेयं जयन्ती, किन्त्वमृतमहोत्सवस्तु 80 वर्ष पूर्तौ, तदनन्तरं वा समायोज्यते, शताब्दीतः पूर्वमिति बहव ऊचुः। अतः ''प्लैटिनमस्य'' पर्यायोऽस्माकं संस्कृतौ कौस्तुभमणि-रुच्यते, श्रीकृष्णस्यायं शोभाकरो मणिः, तस्य च रङ्गः, आकृतिवर्णनं च तादृशमेव यादृशं प्लैटिनमस्य भवतीति 75 वर्षाभिनन्दनोत्सवः कौस्तुभजयन्तीत्युदीरितो विद्वद्भिः। वाराणस्या अनेकेषां विदुषां 75 वर्षीयम-भिनन्दनं कौस्तुभ जयन्तीत्यभिधयाकारि, जयपुरेऽपि तथैवाऽभूत्। प्राचीनकाले तु षष्टिपूर्त्यवसर एवार्धस्यायुषः पूर्तिरूपेणाऽभिनन्द्यतेस्म, यतो हि विंशोत्तरीदशा प्रमाणयति यदस्माकमायुषः फलकं 120 वर्षाणां मन्यते, पाश्चात्यदेशेषु 10 वर्षपूर्तिः एल्युमिनियमजुबिली, 25 वर्षपूर्तिः सिल्वरजुबिलीत्यादि सुविदितमेव। तत्सर्वमनु-सृत्यात्रापि जयन्तीसमारोहा आरब्धा अन्यथा 80 वर्षपूर्तौ ''सहस्रचन्द्रदर्शन'' महोत्सवः समायोज्यते भारतस्य विभिन्नेष्वञ्चलेषु। अतः 75 वर्षपूर्तिसमारोहः कौस्तुभजयन्तीरूपेण सममान्यत बहुत्र। अस्तु, प्रसङ्गवशात्स्मारितैरस्माभिरत्राप्रासङ्गिकमिदं विवरणं पाठकानां प्रमोदाय प्रास्तावि।

डॉ. रमाकान्तशुक्लवर्याय यद्धीरकप्राभृतं ग्रन्थ-चतुष्टयरूपेण समार्प्यत तस्य सुनियोजितं सम्पादनं, सर्वाङ्गीणां, विशिष्टां, संग्रहणीयां सामग्रीं, शुद्धं, सुरुचिरं मुद्रणं, विशालं वाङ्मयफलकं, समग्रस्यापि देशस्य, देशान्तराणां च सर्वेषां विदुषामत्र प्रशस्यं प्रातिनिध्यं च वीक्ष्य सुतरां हर्षगद्गदमभूदस्माकं चेतः। प्रथमे खण्डे विद्वन्मूर्धन्यानां शुभाशिषः अभिनन्दनवाचश्च गद्य-पद्य-गीतिमयशैलीबद्धा मुद्रिताः सन्ति, ततः शुक्लवर्याणां सम्पूर्णो जीवनपरिचयः, कृतित्वविवरणं, शुक्लवर्याणां साक्षात्काराः, संस्कृते हिन्दीभाषायां च प्रस्तुताः, तदनु तेषां प्रमुखकृतीनां समीक्षणमप्यत्र मुद्रितमस्ति। अत्र विविधविदुषां यानि संस्मरणानि मुद्रितानि, तानि सर्वात्मना हृदयावर्जकानि।

द्वितीयः खण्डः ''कविवर रमाकान्त शुक्ल का संस्कृत साहित्य को योगदान'' शीर्षकं शोधग्रन्थं वहति यस्मिन् शोधकर्त्रा डॉ. दुर्गाप्रसादसिंहेन शुक्लवर्याणां वंशपरिचयः, जीवनपरिचयः, कृतिपरिचयः, कर्तृत्व-विवरणं, देशे विदेशेषु च प्रस्तुतिविवरणं, कृतीनां समीक्षणं, विविधविदुषां मतानि संस्मरणानि च सम्यगभिलिखितानि। ग्रन्थोऽयं हिन्दीभाषायां निबद्धोऽस्ति।

तृतीये खण्डे शुक्लवर्याणां ''सर्वशुक्लोत्तरा'' शीर्षकस्य रचनासंग्रहस्य शोधपरकं समीक्षणं कुर्वाणः संस्कृतभाषानिबद्धः डॉ. चन्द्रप्रकाश उप्रेती इत्यस्य शोधविदुषः शोधप्रबन्धः प्रकाशितोऽस्ति। अत्रापि व्यक्तिपरिचयकृतिपरिचय-सर्वाङ्गीणसमीक्षणादिका सर्वविधा सामग्री द्रष्टुं शक्यते।

हीरकप्राभृतस्य चतुर्थः खण्डो वैविध्यमयं विषयवस्तु प्रस्तौति। पञ्चसु भागेषु विभाजितेऽस्मिन् ग्रन्थे नूतना काचन सङ्कलनदृष्टिः प्रस्तुताऽस्ति सम्पादकवर्यैः। सम्पादकीयादनन्तरं शुक्लवर्याणामभिनन्दनसमारोहस्य, प्राभृतसमर्पणसमारोहस्य च विवरणं (भाषणानां संक्षिप्त-प्रस्तुतिसहितं) प्रस्तुतमस्ति। तदनु विशाले भागे शुक्लवर्याणां विभिन्नानां रचनानां (संस्कृतबद्धानां) हिन्दीभाषायां, भोजपुरीभाषायाम्, आंग्लभाषायां वा विविधैरनुवादकैः विहितानुवादाः प्रस्तुताः सन्ति। ''पण्डितराजीयम्'' शीर्षकस्य ध्वनिरूपकस्यात्र मूलयमपि मुद्रितं, हिन्द्यनुवादोऽपि, आङ्गल-भाषानुवादोऽपि।

तदनु शुक्लवर्याणां समकालीनानाम् (अर्थात् वर्तमानकालिकानां) संस्कृतरचनाकाराणां परिचायकाः 21 निबन्धाः संस्कृते, हिन्द्याम्, आंगलभाषायां च मुद्रिताः, सन्ति येषु कवीनां, नाटककाराणां, गद्यकाराणां चापि परिचयः, सहैव काव्यकृतीनां, नाटकानां गद्यकृतीनां चाऽपि परिचयः समीक्षणादिकं च 21 विद्वद्भिर्विलिखितं मुद्रितमस्ति। अपरस्मिन् भागे संस्कृते, हिन्द्यामांगल्यां च विलिखिताः 13 लेखाः (शोधनिबन्धाः कतिपयगद्य-काव्यादिरचना अपि) प्रस्तुताः सन्ति। एतेषां विषयफलकं व्यापकमस्ति।

पर्यन्ते यः सुविशालः सप्तमभागाख्यः खण्डोऽस्ति तत्र समस्तेऽपि हीरकप्राभृताख्ये खण्डचतुष्टये यैः कैश्चिदपि विद्वद्भिः संस्मरणानि, सन्देशाः, शुभाशंसाः, लेखा वा प्रहिता मुद्रिताश्च सन्ति तेषां संस्कृतविदुषां वर्णक्रमेण सुसम्पादितः परिचयो मुद्रितोऽस्ति। तदनु तेषां सर्वेषाम-कारादिक्रमानुसारिणी चित्रदीर्घाऽपि मुद्रिताऽस्ति। नूतनोऽयं प्रक्रमः पाठकानां सविशेषं ध्यानमर्हति यतो हि लेखकानां सुनियोजित-एतादृशः परिचयो न प्रकाश्यतेऽभि नन्दनग्रन्थादिषु।

पर्यन्ते कविवर्यस्य रमाकान्तशुक्लस्य समग्रामपि जीवनयात्रां चित्रयन्ती चित्रदीर्घा मुद्रिताऽस्ति यस्यां बाल्यकालादारभ्य विवाह दिघटनानां, सारस्वता-योजनानां, सम्मानसमारोहाणां यात्राणां च चित्राणि द्रष्टुं शक्यन्ते।

तदनु सम्मानपत्राणामुपाधिपत्रादीनां चापि चित्राणि मुद्रितानि। इत्थं खण्डचतुष्टये विभाजितोऽयमभिनन्दन-ग्रन्थः सम्पादनकौशलमप्यभिव्यनक्ति, संयोजन-कौशलमपि, व्यवस्थापनकौशलमपि मुद्रणकौशलमपि च। स्मरेयुरेव पाठका यत् डॉ. रमाकान्तशुक्लस्य पञ्चाशद्-वर्षपूर्तौ (स्वर्ण जयन्तीत्याख्येऽवसरे) देववाणीसुवासः इति शीर्षकं बिभ्राणो भागद्वये विभाजितोऽभिनन्दनग्रन्थः प्राकाशि 25 वर्षपूर्वं यत्राऽधुनिक संस्कृतसाहित्यपरिचायिका प्रभूता सामग्री प्राकाशि। तामेव स्मारयन् तां चाप्यतिशयानोऽयं खण्डचतुष्टयात्मको ग्रन्थः सुतरां प्रेरकः, संग्रहणीयः स्वागतार्हश्चेति सूचयन्तो भृशं प्रमोदामहे, वर्धापयामश्च

डॉ. रमाकान्तशुक्लवर्यं, साधुवादैर्धन्यवादैश्च सभाजयामः सम्पादकवर्यान्, प्रकाशकान्, सहयोगिनश्च सर्वान्।

**श्रीहीरकप्राभृतम् ( आचार्यश्रीरमाकान्तशुक्ल-हीरकजयन्तीशुभाभिनन्दनग्रन्थः,** प्रधानसम्पादकः आचार्य इच्छाराम द्विवेदी प्रणवः, सम्पादकः डॉ. ऋषिराज-पाठकः, प्रबन्धसम्पादकः डॉ. चन्द्रमौलि-शुक्लः, प्रका. देववाणी परिषद्, आर 6 वाणी विहार, नई दिल्ली 110059, प्रथमः खण्डः, पृ.सं. 540 मू. 1000/-, द्वितीय खण्ड पृ.सं. 570 मू. 1000/-, तृतीय खण्ड पृ.स. 250 मू. 600/-, चतुर्थ खण्ड पृ.सं. 770 मू. 2000/-).

## उपन्यासः सुयोषित्

नारी-चरित्रस्य वैविध्यं प्रस्फोरयन्नेको नवीनः संस्कृतोपन्यासः सपद्येव प्रकाशमाप्तो यत्र पूर्वार्धे षड्यन्त्रकारिणी कान्तध्नी 'चिरण्टी' नायिका वर्णिताऽस्ति या प्रेमिणा सह षड्-यन्त्रमारचय्य पत्युर्घतिस्य योजनां रचयति। ईदृशीं कुयोषितं माधवीं सुयोषित् सुशीला आरक्षिणां सहाय्येन कारावासमन्ततः प्रापयति। इदं हि कुयोषितश्चरित्रम्। उत्तरार्धे सुशीलायाः सुयोषितः कथा वर्णिताऽस्ति या विविधसङ्कटानां पारगमनं विधाय परमात्मनः कृपया साफल्यमाप्नोति।

प्रवाहपूर्णया भाषया, स्थाने स्थाने कथोपकथनादि-शैल्या निबन्धनं विधाय लिखितोऽयमुपन्यासश्छात्रो-पयोगी सम्भवेदित्यपि लेखकस्याशयः प्रतीयते। अत्र कथाप्रवाहे एव यौतुकादिकुप्रथानां विरोधोऽपि व्यञ्जितः, आधुनिकस्थितीनामपि चित्रणं कृतं लेखकेन, घटनाचक्रविस्मयादिभावा अपि व्यञ्जिताः। अस्मिन्नपि प्रारम्भे मुख्यमन्त्रि-शिक्षामन्त्रिप्रभृतीनां सन्देशाः, विदुषां शुभाशंसादिकं च मुद्रितमस्ति, अन्ते कठिनशब्दानां हिन्द्यर्था वर्णक्रम सूच्यनुसारं मुद्रिताः।

**सुयोषित्** (ले. सांवरमल शास्त्री), प्रका. सौरभ पब्लिकेशन झालानियों का रास्ता, जयपुर पृ.सं. 116 मू. 150/-.

## नूतनकाव्यसंकलनम्

भारती पाठकानां सुपरिचितस्याऽऽधुनिकशैली-मनुसृत्य काव्यरचनाकर्तुः डॉ. कौशल तिवारिणो नूतन-काव्यरचनासंग्रहः ''गुलिका'' शीर्षकः सपद्येव प्रकाशमायातो यत्र 49 छन्दोमुक्तरचनाः सङ्कलिताः सन्ति यासु पर्यन्ते ''हाइकु'' इत्याख्यजापानदेशाऽऽयातित-रचनाविधा-बद्धाः 22 काव्योक्तयः, गजलगीता-नुहारिण्यः 4 सान्त्यानुप्रासाः काव्यरचना विशेषतः द्रष्टव्याः सन्ति। जानन्त्येव पाठका यत् हाइकुविधायां केवलं 17 अक्षरेषु कविः स्वाभिप्रायं प्रस्तौति। समये-समये साम्प्रतिकं चिन्तनमद्यतनीः समस्याश्चाधिकृत्य कविरयं नूतनकाव्यसर्जनमनुतिष्ठति, पत्र-पत्रिकासु तत्प्रकाश्यते च। तस्य सङ्कलनमिदं प्रयागतः प्रकाशितम्। कतिपयरचना भारत्यां समये-समये प्राकाश्यमभजन् कतिपयाश्च ''पद्यबन्धा'' - ''सम्भाषण सन्देशः'' - ''संस्कृतप्रतिभा'' प्रभृतिपत्रिकासु। रचनानामधस्तात् पत्रिकाणां नामाप्युल्लिखितमस्ति। आधुनिक कवीनामुक्तिशैली प्रतीकरूपेण पार्यन्तिकमान्तरालिकं वा व्यंग्यार्थं संक्षिप्य प्रस्तौतीति तस्या विशेषः। संस्कृतेऽप्याधुनिककाव्यसर्जकवर्ग एतादृशो निरन्तरं कवयति, प्रकाशं चाऽप्यायातीति गीर्वाणवाण्या अस्याः सार्वयुगीनता सार्वदैशिकता चापि प्रमाण्यते सुस्पष्टम्। नूतनकाव्यसंग्रहस्यास्य स्वागतमाचरामो वर्धापयामश्च युवकविं डॉ. कौशलतिवारिणम्

**गुलिका**- कविः डॉ. कौशल तिवारी, सम्पादकः डॉ. नारायणदाशः, प्रका. कथाभारती 57 वसन्त विहार, झूसी, इलाहाबाद पृ.सं. 88 मू. 250/-.

बाबासाहेबआप्टे महोदयानां व्यक्तित्ववर्णने-

# अष्टादशः प्रसङ्गः-शिक्षाप्रदानस्य कला

❑ वेणीमाधव गो. धर्माधिकारी

संसद्सदस्याः श्रीमहावीरबन्धवो वर्णयन्ति-तदा वयं लाहौरनगरे आस्म-बाबामहोदयाः वर्षे एकवारं प्रान्त-भ्रमणार्थमायान्ति स्म। अस्माभिर्ज्ञातं यत् शाहद-रास्थाने यद्विरावीनद्याः पारे स्थितत्वात् शेखुपुरा क्षेत्रे समायातिआपटेमहोदयानां कार्यक्रमोऽस्ति। अस्मासु कतिपयानां मनसि लोभः समभवत् यत् किं न तत्र गच्छेम।

एकेन चिन्तितं सर्वैश्च स्वीकृतम्। सायं शाखानन्तरं स्वयंसेवकैर्मिलनकार्यान्निवृत्त्य द्विचक्रिकास्वारुह्य-निस्सृताः। शीतकालः, सर्वान् कम्पयन् तीव्रगतिर्वायुः सम्भवतः स्वल्पा बिन्दुवृष्टिरप्यभूत् परं मत्तानामेतेषु ध्यानमेव क्व? अर्द्धरात्रिप्राये समये सम्प्राप्ताः। लाहौर-नगरस्य सुप्रसिद्धानां वैद्यवर्याणां ठाकुरदत्तमुल्तानी-महोदयानां गृहे आसीदाप्टेमहोदयानामावासव्यवस्था। प्रातः कार्यक्रम आसीत् परमाप्टेमहोदयाः नैव सुप्ताः। सर्वेऽपि निश्शङ्कं तेषां समीपे आगत्योपविष्टाः। आप्टे महोदयाश्च स्वस्याद्भुतस्मरणशक्तिबलमाश्रित्यैकैकस्य-नाम स्मृत्वा कुशलप्रश्नादिकं चक्रुः। क्रमोऽयं यदा सम्पन्नस्तदैव वैद्यमहोदयाः सरलस्वभावतयाभिशंसां चक्रुः। एतावद्दूरत इमे समायाताः एतेभ्यः कश्चिदुपदेशः प्रदीयतामिति।

उपदेशः ? वैद्यबन्धो ! नैते मत्त उपदेशं ग्रहीतुं समायाताः एते तु मां शिक्षयितुं समागताः। अवलोकयन्तु भवन्तः एतादृशे विलक्षणे समये महता परिश्रमेणैत्तेऽत्र सम्प्राप्ताः, एतैरहमुपदिष्टः-यत्र स्नेहो भवति तत्र मनुष्यो न किमपि कष्ट मनुभवति। पुनश्च-अन्धकारः, शैत्यं, कम्पयन् वायुः वृष्टिभयम् अथाप्येते सर्वे अव्याकुलाः स्वगृहेभ्यो निस्सृताः। हसन्तः क्रीडन्तश्चात्र सम्प्राप्ताः। एतैरेवं मह्यं शिक्षा प्रदत्ता-यदा व्यक्तौ भावनायाः दृढता भवति तदा कष्टं मार्गस्य बाधा नैव भवति अपितु आकर्षणं भवति। अहन्तु सुखपूर्वकं सुविधापूर्णेऽस्मिन् प्रासादे उपविष्टोऽस्मि। नहि नहि नाहमेतेभ्य उपदेष्टुं शक्नोमि। उपदेशशब्दस्तु न संघे प्रचलति परं शिक्षा प्रदानं तु भवत्येव। अत्र च आप्टे महोदयै नं केवलं शिक्षैव प्रदत्ता अपितु शिक्षाप्रदानस्य कलापि शिक्षिता।

परं बाबामहोदयेन किमवबोधितमित्यस्याकलनं न सरलम्। तेषां सरला सौम्या च मुखाकृतिः, महता उष्णीशेनाच्छन्नं स्मितम्, निश्छलः स्पष्टो मन्दहासः, किं विस्मर्तुं शक्यते। कियती च स्वाभाविक्यात्मीयता कथं विस्मरणीया?

प्रायोऽन्तिमवारं तेषां दर्शनं कतिपयमासेभ्यः पूर्वं नागपुरे अभवत्। जायमानानां विधानसभानिर्वाचनप्रसङ्गे ऽहं मध्यप्रदेशं गच्छन्नासम्। एकरात्रौ तत्र विश्रामः करणीय आसीत्। रात्रौ विमानेन तत्र गत आसम्। कार्यालयस्याधस्तलस्थे कक्षे एव मे शयनस्य व्यवस्था आसीत्। प्रातः प्रस्थानसमये ज्ञातं बाबामहोदया-

स्तत्रैवासन्। प्रकृतिरस्वस्थासीदिति। श्रीकृष्णराव-मोहरीरमहोदयाः मामवाबोधयन्- यत्तैर्ज्ञातमस्ति अहमागतोस्मीति। यावत्ते मिलितुं नागच्छेयुस्तावदेव मया उपरि गत्वा मेलितव्यं-यतश्चिकित्सकैस्तेषां चलन-भ्रमणार्थं निषेधःकृतोऽस्ति। अहं प्रधावन्नुपरि गतः, प्रणामः कृतः तेषां स्वास्थ्यविषये च प्रश्नः कृतः। परं मत्प्रश्नं महत्वहीनविषवदपसार्य तैः प्रश्नः कृतः-रात्रौ सुखशयनमभून्न वेति।

तैः स्मृतः पूर्वकालिकोऽवसरः यदा एवमेव मे एक-रात्रिविश्रामोऽभूत्। तदा न जाने किमिति मे उदरशूलः समुत्पन्नः। इतस्ततो भ्रमणं, चलनं, शय्यायामावर्त्तन-प्रत्यावर्त्तनं सर्वं वृथा अभवत्। तदाहमेकं सुप्तं कार्यकर्त्तारं जागरयित्वा अप्रच्छम्-अजवाइननामक-मौषधं मेलिष्यति किम्? स महत्या तत्परतया गतः किञ्चित्कालानन्तरमेवैकद्विवरिष्ठबन्धुभिस्सार्धं किञ्चि-दौषधमादायागतः। यथाकथंचिच्छान्तिः संप्राप्ता। तदाहं सुप्तः। प्रातराप्टेमहोदयैर्मिलितस्तदावगतं यदवाञ्छयापि या गतिविधिर्मया विहिता तदा तेषामपि-निद्राभंगः संजातः। यः स्वयंसेवकबन्धुः अजवाइनारख्यमौष-धमन्वेषयन्नासीत् न स मे नाम जानाति स्म अतः ''कस्मै पीडास्ति'' इत्यस्योत्तरे स केवलमस्ति कश्चिदागन्तुकः इत्येवावदत्। परमजवाइननाम्ना कश्चिदुत्तरप्रदेशीयोऽस्ति इत्येतावता बाबामहोदयैरनुमितमहं स्यामिति। मयापि च सन्तोषः कृतः तस्मै मे नाम ज्ञातं नासीदन्यथा रात्रौ द्विवादनसमये बाबामहोदयं शयनादुत्थाप्याधः आव्हानस्यापराधो मे शिरस्यापतितः स्यात्।

---

**प्रेरकप्रसङ्गशतकम्**

# अष्टात्रिंशःप्रसङ्गः-लवणाधिक्ये किं करणीयम्

❑ **श्रीमती आराधना धर्माधिकारी**

एकश्छात्रः कक्षायामुदासीन एवोपविशति स्म। शिक्षको जानातिस्म यत्तस्य जीवने बहवः कटु प्रसङ्गाः समागता आसन्। एक दा एतं स्वगृहे समाह्वयत्। यदा स तत्र सम्प्राप्तस्तदा शिक्षकोऽवदत्-चल जम्बीररसं (शिकंजी) पिबामः। सः स्वयमेव रसनिर्माणमकरोत्। इदमेकं मधुराम्लंपेयमस्ति हिन्दी भाषायां शिकंजीति कथ्यते। अस्मिन् शर्करालवणं चेत्युभयोर्मिश्रणं भवति। शिष्यः प्रथममेव पिबन्नवदत् अहो! अस्मिन् तु लवणमधिक-मस्ति। शिक्षकः अवदत् तर्हि प्रक्षिपेदम्। तेनोक्तं नहि नहि आचार्य! अस्मिन् अधिकशर्करामेलनेन सन्तुलनं भविष्यति पेयं च सुस्वादु भविष्यति।

शिक्षकेन त्वरितमेव कथितं सम्यगुक्तं त्वया अस्माकं जीवनेऽपीदमेव सत्यम्। यदा दुःखं, पीडा क्लेशादीनामाऽधिक्यं स्याज्जीवनं न त्यक्तव्यम् अपितु तस्मिन् सकारात्मकता, आशा, कर्मठता, स्नेहः, त्यागः, सहयोग इत्येतेषां माधुर्यस्य मात्रा वर्द्धापनीया। छात्राय सुखमयजीवनस्य सूत्रं सम्प्राप्तम्।

# भारतीमञ्जुनिकुञ्जम्

## ( पूर्वानुवृत्तम् )

❑ डॉ. रामनारायण झा

**विश्वकोषमहत्त्वम्**

विश्वकोषस्स्वनाम्ना विशालो प्रति,
मित्रवच्चोपकारं विधत्तेऽद्य सः।
संस्कृतज्ञं कविं शास्त्रसञ्चालकम्,
आहता भारते भारती हा कथम्।। 235।।

**अमरसिंहामरकोषगुरुता**

सिंहनामामरो मौक्तिकोऽयन्तदा,
गुप्तराजः करोति स्म राज्यं यदा।
भारतीं स्वीयकृत्यानिशं सेवते,
हा कथं भारती आहता भारते।। 236।।

**खगोलविज्ञानी आर्यभट्टः**

आद्यवैज्ञानिकेनार्यभट्टीयकं,
ग्रन्थरत्नं कृतम्वै खगोलान्वितम्।
भारतस्यार्यभट्टेन विख्यातकम्,
आहता भारते भारती हा कथम्।। 237।।

**सूर्यचन्द्रग्रहणादिज्ञ आर्यभट्टः**

प्रोक्तवानार्यभट्टोऽतिमेधाविनां,
सूर्यचन्द्रग्रहज्ञानहेतौ रतः।
बाभ्रमीतीति चेला निजाक्षेऽनिशम्,
आहता भारते भारती हा कथम्।। 238।।

**शून्य-लव-सिद्धान्तप्रतिपादकम् आर्यभट्टीयम्**

अङ्कबीजान्वितं ज्यामितीसंयुत-
मद्वितीयार्यभट्टीयरत्नं लवैः।
शून्यराद्धान्तपुष्टं सुघुष्टं कृतम्,
आहता भारते भारती हा कथम्।। 239।।

**वामनकोषः**

शब्दजां वामनश्चाद्य चिन्तां विदां,
नश्यतीति प्रथां स्वीयकोषेण ताम्।
भारतीं वन्दते भारतीज्ञश्श्रमी,
आहता हा कथं भारते भारती।। 240।।

एष शब्दार्णवो मन्त्रवन्मज्जयन्,
कौशलं स्वीयवाग्भिर्विधत्तेऽमितम्।
भारतीं मातरं सज्जयन् शाश्वतम्,
आहता भारते भारती हा कथम्।। 241।।

**वाचस्पत्यकोषः**

निर्ममे शान्तमत्या सुकोषं बुधा -
मर्चितां सेवमानोऽनिशं मातरम्।
तोकवच्चैष वाचस्पतिर्बोधितः,
हा कथं भारते आहता भारती।। 242।।

**सद्गुरुः**

जीवतां सारमामुत्रिकं भद्रदं,
सन्दिशन्नैहिकम्वानिशानन्दगम्।
वीक्षयन्सत्यमज्ञानदं सत्पथम्,
भारती आहता भारते हा कथम्।। 243।।

जन्मजन्मान्तरीयं मलं मानसं,
सारयित्वातिपीनं स यो मायिकम्।
गंगया गाययेद्भक्तिगीतं गिरा,
हा कथं भारते भारती आहता।। 244।।

मेलयेन्मित्रवन्नैष नित्यात्मनां,
संगतेः साकमध्यात्ममर्चिस्सताम्।
ब्रह्मणा दीपयेद्दान्तशान्तः क्षमी,
हा कथम् आहता भारते भारती।। 245।।

व्याख्याता (संस्कृतम्)
राजकीय कल्याणमहाविद्यालयः, सीकरम्

# आत्मसम्प्रत्ययः

❑ यादवेन्द्र शर्मा

मनोविज्ञाने प्राणभूतेषु विषयेषु व्यक्तित्वमन्यतमं भवति। व्यक्तित्वविषये पाश्चात्त्यदेशे बहवः सिद्धान्ताः प्रवर्तिताः दृश्यन्ते। ते च प्रकार-गुण-संज्ञारूपेण त्रेधा विभागमर्हन्ति। प्रकारसिद्धान्तः व्यक्तौ विद्यमानं कञ्चन अंशम् आधृत्य व्यक्तेः प्रकारनिरूपणं विदधाति। गुणसिद्धान्तः अन्तर्निहितस्य वंशसूत्रादिस्रोतसः आधारेण जीवस्य स्वभावं विवृणोति। संज्ञानसिद्धान्तः जीवनिष्ठेतरकारकाणि बुद्ध्यादीनि आश्रित्य सिद्धान्त-स्थापनपूर्वकं व्यक्तित्वं निरूपयति।

व्यक्तित्वपदम् आंग्लभाषायां Personality इति उच्यते। व्यक्तौ यत्किञ्चित् वर्तते तस्य समग्रता नाम व्यक्तित्वमिति सामान्यतया वक्तुं शक्यते। व्यक्तित्वशब्दः सर्वस्यापि तस्य बोधको भवति यत्किञ्चित् व्यक्तौ विद्यते। मनः, शरीरम्, स्वभावः, चरित्रम्, अन्यैः साकं व्यवहारशैली च एतस्मिन् अन्तर्भवति। मनुष्यस्य संवेदना, मूलप्रवृत्तयः, प्रत्यक्षज्ञानम्, संवेगाः, कल्पनाः, स्मृतिः, शिक्षणं, बुद्धिः, विवेकः, अन्यच्च तत्सम्बन्धि सर्वं व्यक्तित्वे समाविष्टं भवति।

**व्यक्तित्वविषये भारतीयानां विचाराः -**

भारतीयानां वैदिककालादाराभ्यैव मनसः अस्तित्वं हृदयस्य विकासश्च परिचितः आसीत्। षड्दर्शनेषु न्याय-वैशेषिक-सांख्य-योग-मीमांसा-वेदान्तेषु मनसः वैज्ञानिकं पठनं विशेषेण कृतं वर्तते। मुख्यतया पातञ्जलयोगदर्शन एव आधुनिकी विचारधारा प्रकटीकृता दृश्यते।

व्यक्तित्वशब्दः व्यक्तिशब्देन स्वाभाविकतया सम्बन्धः। व्यक्तीनां मध्ये भिन्नता व्यक्तित्वेनैव भवति। व्यक्तित्वं बाह्यमान्तरिकं चेति द्विधा भिद्यते। बाह्यव्यक्तित्वं नाम शारीरिकविशेषाः प्रकटरूपेण दृश्यमानाः आकाराः चेष्टाश्च भवन्ति। आन्तरिकं व्यक्तित्वं नाम आन्तरिकीणामाभिवृत्तीनां संवेदनानां तथान्यासाम् आन्तरिकसत्तानां समाहारः। एतैः बाह्यान्तरिकव्यक्तित्व-विशेषैः जनाः विभिन्नाः प्रतिभान्ति। विविधेषु विज्ञानविभागेषु उपपादितं निर्धारितं च व्यक्तित्वम् अस्मिन्नेवान्तर्भवति।

भारतीयाचार्याणामभिप्रायमनुसृत्य व्यक्तिः अन्ततोगत्वा ''आत्मा'' एव भवति। आत्मस्वरूपमेव व्यक्तित्वम्। यद्यपि व्यक्तित्वम् आंशिकरूपेण सर्वेष्वपि प्रतिफलति तथाऽपि पूर्णतया व्यक्तित्वस्य प्रतिफलनम् अथवा प्रकटीकरणं दुःसाध्यमेव। व्यक्तेः स्वरूपं यदा स्वयमवगच्छति, अनुभवति अथवा आत्मा साक्षात्करोति तदा तस्य व्यक्तित्वं सम्पूर्णरूपेण प्रतिफलतीत्यवगन्त-व्यम्। व्यक्तित्वविकास इत्युक्तेः आत्मसाक्षात्कारमार्गस्य सोपानमेव भवति। मनुष्यस्य जीवनं व्यक्तित्वस्य पूर्णविकासाय एव भवति। विकासस्तु तदैव पूर्णतां प्राप्नोति। यदा व्यक्तिरात्मस्वरूपमवगच्छति, अनुभवति स्वस्वरूपं ज्ञात्वा व्यक्तिः परिपूर्णा भवति, तृप्ता भवति। सा एवावस्था सर्वैः वाञ्छनीया, लक्ष्यरूपेण परिगणिता एव। सफयामहोदयस्य अभिप्रायेणापि व्यक्तित्वस्य सारांशः आत्मा एव।

भारतीयाचार्याणामभिप्रायेण ''व्यक्ति'' शब्दे-नान्ततोगत्वा आत्मैव निर्दिष्टो भवति। अस्मिन् विषये न कस्यापि भिन्नाभिप्रायो वर्तते। आत्मनः स्वरूपं प्रत्येव भिन्नाभिप्रायाः सन्ति दार्शनिकेषु-

आदिशङ्कराचार्यस्य मते ''आत्मा चिद्रूप:''। रामानुजादयस्तु विज्ञानमानन्दादिकम् आत्मगुणा: परिगणयन्ति। बौद्धा: आत्मन: अस्तित्वस्य स्थाने धारावाहिकविज्ञानं स्वीकुर्वन्ति। एवं भिन्ना: अभिप्राया: वर्तन्ते इत्येवमवगन्तव्यम्।

व्यक्तित्वसम्पन्न: पुरुष: गुणातीतो भवति। भगवद्गीतायां चतुर्दशाध्याये व्यक्ति: कदा पूर्णतां प्राप्नोति इत्येतं प्रति संकेतोऽस्ति। सत्वरजस्तमोगुणानां परस्परसन्निवेशेन विविधा: क्रिया: तत्फलानि च सञ्जायन्ते।

**सत्त्वं रजस्तम इति गुणाः प्रकृतिसम्भवाः।**
**निबध्नन्ति महाबाहो देहे देहिनमव्ययम्।।**

एते गुणा एव अवश्यं देहिनमात्मानं निबध्नन्ति। एतस्मात् त्रिगुणात्मकबन्धनात् मुक्ति: देहिका: स्वरूपं ज्ञात्वैव भवति। सत्त्वगुणस्य आधिक्येनैव ज्ञानमुद्भवति।

**सत्त्वात्सञ्जायते ज्ञानं रजसो लोभ एव च।**
**प्रमादमोहौ तमसो भवतोऽज्ञानमेव च।।**

ज्ञानं लब्ध्वा मनुष्य: गुणातीतो भवति।

**गुणानेतानतीत्य त्रीन्देही देहसमुद्भवान्।**
**जन्ममृत्युजरादुः खैर्विमुक्तोऽमृतमश्नुते।।**

इत्यादिना गुणातीत: परमार्थतत्त्वज्ञ: कदा भवति कथं च व्यवहरति इत्यादिशङ्कायां यदा द्वन्द्वातीतो भूत्वा जीवनं यापयति तदैवेत्यवगन्तव्यम्।

व्यक्तित्वविकासस्योपरि विविधसोपानानि तैत्तिरी-योपनिषदि निर्दिष्टानि वर्तन्ते-

अस्याम् उपनिषदि पञ्चकोशा: विद्यन्ते। जीवात्मा पञ्चकोशान्त: स्थित:। कोशेष्वत्यन्तं बाह्यस्थितकोशो भवत्यन्नमयकोश: अन्नमयकोशस्यान्त: प्राणमयकोश:। तस्याप्यन्त: मनोमयकोशस्तिष्ठति। मनोमयकोशस्यान्त: स्थितो भवति विज्ञानमयकोश: सर्वेषामेतेषां कोशानामन्त: आनन्दमयकोशोऽवतिष्ठति।

''तस्माद्वा एतस्माद्विज्ञानमयादन्योऽन्तरात्माऽऽ-नन्दमय:'' इति उपनिषद्वाक्यम्। अस्मिन्न नन्दमय-कोशे स्थितस्य जीवरूपस्य चैतन्यस्य स्वरूपं यदा साक्षात्क्रियते तदैव लक्ष्यं पूर्णं भवति। व्यक्तित्वस्य विकास: पूर्णो भवति इत्यर्थ:।

**५ आत्मसम्प्रत्यय: ( The Concept of Self )**

तादृशशैक्षिककार्यक्रमाणां विकास: स्यात् येन व्यक्ते: वैयक्तिकताया: पूर्ति: स्यात्। विकासप्रक्रियायां व्यक्तित्वं हि नियामकमिति हेतो: आत्मा नाम क: इति ज्ञानं नितरामपेक्ष्यते।

**John's Burbacher** आत्मन: महत्त्वं मौलिकं भवतीति द्रढयति। स्वीयाधिगमानुभवानां प्रवाहेण स्वीयास्तित्वस्य संरक्षणं शिशो: प्रतिकूलताप्रवृत्ति: भवति। व्यक्ते: आत्मना विना अस्तित्वमेव नास्ति। वैयक्तिकभावना: चिन्तनं विकल्पाश्च व्यक्तित्वेन आत्मना वा निकटसम्बन्धं स्थापयन्ति। वस्तुत: स्वीयमस्तित्वं व्यक्ति: अभिजानातीति अवश्यं ज्ञातव्यं भवति। इदमपितु ज्ञातव्यं यत् कथं व्यक्ति: अथवा आत्मा जगति सम्प्रत्ययान् अभिवर्तयति। तथा च आत्मसम्प्रत्यया: एव समन्वितव्यक्तित्वस्य कारणम्। वस्तुत: समन्वित-व्यक्तित्वस्य निर्माणे आत्मा एव अनिवार्यकारणं भवति। मनोविज्ञानिन: आत्मा (व्यक्ति:) तार्किकातार्किकाधारै: निर्मित: इति मन्वते। बहव: मनोविज्ञानिन: आत्मसम्प्रत्यया इति।

आत्मसम्प्रत्ययस्य च मध्ये कश्चन भेद: परिकल्पित: अवलोक्यते। व्यक्तित्वस्य समग्रतां निर्दिशति अहंमति:। एषा निषदनविकासयो स्रोत: भवति। आत्मसम्प्रत्ययस्तु

व्यक्ते: आत्ममूल्याङ्कनात्मको भवति। अर्थात् वास्तविकनिष्पादनस्यानुभवानां यथार्थपरीक्षणस्य सीमारूपेण वर्तते। आत्मसम्प्रत्यय: व्यक्ते: वैयक्तिकसमस्या: अभिमुखीकर्तुं मार्गदर्शकरूपेण कार्यं विदधाति।

**आत्मन: स्रोत: ( The origin of self )**

सामाजिककरणप्रक्रियायां निष्पन्नं प्रमुखं मनो-वैज्ञानिकसंघटनमेव आत्मा भवति। आत्मन: प्रभवनं वर्गे इतरसदस्यै: जायमानयान्त: क्रियया एव भवति, अत: आत्मा सामाजिकपरिणाम एव।

शिशु: व्यक्तित्वेन स्वीयं सम्प्रत्ययं न धत्ते इति मनोविज्ञानिन: अभिप्रयन्ति। 'प्याजे' महोदयेनोक्तं शिशु: अभिन्ननियतीनां मध्ये जीवति। अत एव प्याजे वदति-

शिशु: यावान् अवरो भवति तावत् च आत्म-सम्प्रत्यय: अदृश्यमानो भवति।

आत्मन: ज्ञानं प्राय: जन्मन: वर्षद्वयात् परमेव ज्ञायते। अत एव सामान्यस्थानं विहाय नान्यत् किञ्चित् परिचिनोति शिशु:। अपि च तस्य जागर्या च स्वरचितरेखां नातिक्राम्यति। तथा च यावत् इतरविषयकसम्प्रत्यय: न जायते तावत्तौलनिकसम्प्रत्यया: असम्भवा एव।

व्यक्ते: स्वीयात्मनोऽवगति: इतरेषामात्मनामवगतिम् अपेक्षते। आत्मसम्प्रत्य: अन्तर्व्यक्तिसम्बन्धेनैव जायते।

समाजेन सह सम्बन्धै: ''अहम्'' इत्यस्य विकास: जायते। स्वस्य एवं सामाजिकविकासस्य सङ्कल्पना अन्योन्याश्रिता वर्तते। उभयोर्मध्ये या अन्त: क्रिया जायते सा अन्त: क्रिया उभाभ्यां प्रभाव्यते। समाजे ''अहम्'' इत्यस्य विकास न्यूनाधिक्यप्रमाणेन भवति। गान्धिमहोदयानुसारं- Personality is total pattern of these components of the self, the mind and the body. It is through intemate contact with the external, social and physical environment that the proper manifesation of personality is achieved.

आत्मसम्प्रत्यय: नाम स्वविषये स्वसामर्थ्यविषये च कृतं परीक्षणम्। तन्मध्ये व्यक्तित्वस्य सर्वाङ्गानामन्तर्भाव: भवति। आत्मसम्प्रत्यययुक्तव्यक्ते: आचरणं काल्पनिकं, सामर्थ्ययुक्तं, निर्णयक्षमतानुसरणञ्च भवति। वृत्तिस्तु नेतृत्वगुणयुक्ता, परोपकारिणी, आत्मसमर्पणयुक्ता च भवति।

**आत्मसम्प्रत्ययस्य महत्त्वम्-**

आत्मसम्प्रत्यय: व्यक्तिविकासस्य महत्त्वपूर्ण: घटक इति मन्यते। यदा आत्मसम्प्रत्यय: जायते तदा व्यक्ति: व्यक्तित्वस्य विकासार्थम् उत्कृष्टरीत्या विकासकार्यं करोति। सकारात्मकसम्प्रत्यय: विकास: आवश्यक: वर्तते। स्वकीया प्रतिभा यावत् स्पष्टा भवति तावत् तस्या: आचरणस्य दिशा निश्चिता वर्तते। अभिवृद्ध्यर्थं विकासार्थं च आत्मसम्प्रत्ययस्य महत्त्वमधिकं वर्तते। व्यक्ति: यत्किमपि करोति तत् साधयितुं प्रयतते। एतत्सर्वमात्मसम्प्रत्ययनेन शक्यं भवति। आत्मसम्प्रत्यये शारीरिक:, मानसिक:, सामाजिक:, बौद्धिक: शैक्षणिक-विकासश्च जायते। आत्मसम्प्रत्यये विद्यमाने आत्मन: एवं समाजस्य अन्त:क्रिया सम्पद्यते। यस्या: प्रभाव: आत्मन: एव समाजस्योपरि पतति। व्यक्ते: आत्मसम्प्रत्यय: स्पष्टो भवति चेत् तस्य उपयोग: व्यक्ते: निमित्तं, समाजनिमित्तं, राष्ट्रनिमित्तञ्च भवति।

**शोधच्छात्र:**
**( शिक्षा संकाय: )**
**ज.रा.रा.सं. वि.वि. मदाऊ, भांकरोटा, जयपुरम्**

नारी-स्तम्भः

# यत्र विद्या विमुक्तये

❑ डॉ. राजेश्वरी भट्टः



अशीतिवर्षाणि पूर्वं रास्थानराज्यस्य सुदूरे ग्रामे संस्थापिता वनस्थली विद्यापीठनाम्नी महिला-शिक्षणसंस्था उच्चादर्शेन सन्मूल्येन सुप्रबन्धनेन च अहरहः नवं नवं कीर्तिमानं स्थापयन्ती न केवलं राष्ट्रियस्तरे अपितु अन्ताराष्ट्रियस्तरे विश्रुतासु महिलाशिक्षणसंस्थासु अग्रगण्या स्पृहणीय-छात्राभिः अहमहमिकया वृत्या वरणीया महिला-शिक्षाः संस्था विद्यते। राजस्थानप्रदेशे टोंक जिलान्तर्गते निवाईग्रामे स्थितस्य वनस्थली विद्यापीठस्य स्थापना राजस्थानराज्यस्य पूर्वमुख्य मंत्रिणा हीरालालशस्त्रिमहाभागेन 1935 तमे वर्षे आत्मनो मेधाविन्याः सेवाभाविन्याः प्राणसमाया द्वादश-वर्षीयायाः पुत्र्याः शान्ताया आकस्मिक निधनानन्तरं तस्याः स्मृतिचिरन्तनतां विधातुं भावभरितेन हृदयेन विहिता। समयेऽत्र परिचितानां मित्रगणानां पञ्चषाः पुत्र्य एव पठनाय प्रविष्टा जाताः। अचिरमेव शास्त्रिदम्पत्योः सत्संकल्पेन दृढपरिश्रमेण च शिक्षण-संस्थायां छात्राणां संख्या प्रतिवर्षं वर्द्धमानाऽऽस्ति कालेन सततं पुष्पिता पल्लविता चेयं शान्ताबाई-कुटीरनाम्नी महिला शिक्षणसंस्था वनस्थलीविद्यापीठनाम्ना विकसिता जाता। वनस्थलीविद्यापीठे शिशुकक्षाया आरभ्य स्नातकोत्तरकक्षायाः छात्राणां कृते अध्ययनस्य उत्तमा व्यवस्था वर्तते सहैव अनुसन्धानपरक-योजनानां शोधकार्याणां सम्पादनाय च समुचित-मार्गदर्शनं सुलभं वर्तते। वनस्थलीविद्यापीठस्य पुस्तकालये छात्राणां कृते एकलक्षसंख्यकानि पुस्तकानि संगृहीतानि सन्ति यस्मिन् विषयाणां दुर्लभ-पुस्तकानि छात्राणां मार्गदर्शनं कुर्वन्ति। विश्वस्मिन्नपि विश्वे घटितानां दैनन्दिनीनां घटनानां सूचनानाञ्च ज्ञानाय पुस्तकालये 750 दैनिक-पाक्षिक-मासिक पत्रिकाः समुपलब्धाः सन्ति। पुस्तकीय ज्ञानादतिरिक्तं वनस्थलीविद्यापीठे निवसन्तीनां छात्राणां सर्वतोमुखविकासाय शारीरिकशिक्षा व्यावहारिक शिक्षा-कलाशिक्षा-नैतिकशिक्षा तथा बौद्धिक-शिक्षाणां पूर्णव्यवस्था वर्तते। सूचना प्रौद्योगिकी तथा अन्यवैज्ञानिक विषयाणां सम्यग्ज्ञानाय विद्यापीठे योग्यप्रशिक्षका नियुक्ताः सन्ति। भारतसर्वकारेण मानित-विश्वविद्यालयरूपेण सम्मानितस्य वनस्थली-विद्यापीठस्य बहुमुखवैशिष्ट्येनाभिभूता नैकाश्च्छात्रा विद्यापीठे प्रवेश मधिगतुं समुत्सुका दृश्यन्ते। प्रतिवर्षं भारतवर्षस्य विभिन्न प्रदेशेभ्यः केन्द्रशासित प्रदेशेभ्यो विदेशेभ्यश्च नैकाश्च्छात्रा अध्ययनस्य कृते वनस्थलीविद्यापीठे प्रवेशमिच्छन्ति। विदेशेभ्य आगच्छन्तीनां छात्राणां कृते विद्यापीठे वर्षपर्यन्तं भारतीयसंस्कृतिदर्शनयोः विशिष्टाध्ययनं अनिवार्य-मस्ति। विदेशेभ्य आगतानां छात्राणां कृते वनस्थलीविद्यापीठे प्रबन्धकैः शान्ताविश्वनीड़म् नाम्ना भवनमेकं निर्मितम्। अत्राध्ययने प्रवृत्तानां छात्राणां कृते विशिष्टपाठ्यक्रमस्य प्रावधानं वर्तते। यस्मिन् प्रमुखरूपेण गाँधिदर्शन-भारतीयभाषाज्ञानम् भारतीय चित्रकलाया नैपुण्यं, भारतीयसंगीतस्य नृत्यस्य च ज्ञानम् समन्वितमस्ति। वनस्थलीविद्या-पीठस्य छात्राणां कृते स्वावलम्बनं, सारल्यं स्वदेशी-

**वस्त्रधारणम्, अनिवार्यं वर्तते। स्पष्टमस्ति यत् अध्यात्मविज्ञानयोः समुचितसमन्वयेन छात्राणां सर्वतोभद्राय संकल्पवती वनस्थलीविद्यापीठनाम्नी महिलाशिक्षण संस्था सार्थकशिक्षायाः कृते अनुपमा संस्था विद्यते यत्र शिक्षामधिगच्छन्तीनां छात्राणां जीवनं सफलं सुखदं सार्थकं च भवति।**

**हिन्दी में**

80 वर्ष पूर्व राजस्थान राज्य के सुदूरगाँव में संस्थापित वनस्थली विद्यापीठ नामकी महिला शिक्षणसंस्था अपने उच्च आदर्श सन्मूल्य एवं सुप्रबन्धन के कारण दिनों दिन नये-नये कीर्तिमान् स्थापित कर न केवल राष्ट्रियस्तर पर अपितु अन्तर्राष्ट्रीय स्तर पर प्रसिद्ध महिला शिक्षण संस्थाओं में अग्रगण्या स्पृहणीया तथा छात्राओं द्वारा अत्यन्त वरीयता से वरणीया है। राजस्थान प्रदेश के टोंक जिलान्तर्गत 'निवाई' ग्राम में स्थित ''वनस्थली-विद्यापीठ'' की स्थापना राजस्थानराज्य के पूर्व मुख्य मंत्री हीरालाल शास्त्री के द्वारा 1935 में अपनी मेघाविनी, सेवाभाविनी तथा 12 वर्ष की प्राणप्रिया पुत्री 'शान्ताबाई' के निधन के पश्चात् उसकी स्मृति को चिरस्थायी बनाने के लिए भावपूर्ण हृदय से की गई थी। शान्ताबाईकुटीर नामक शिक्षण संस्था की स्थापना के समय विद्यालय में परिचितों एवं मित्रगणों की पाँच छः छात्राओं ने प्रवेश लिया था। शीघ्र ही दम्पत्ती के सत्संकल्प एवं दृढ परिश्रम के कारण शिक्षणसंस्था में बालिकाओं की संख्या प्रतिवर्ष बढ़ती गई। कुछ समय पश्चात् श्री शान्ताबाई कुटीर नाम की शिक्षण संस्था वनस्थली विद्यापीठ नाम से विकसित हो गई। वनस्थली विद्यापीठ में छात्राओं के लिए शिशु कक्षा से स्नात्तकोत्तर कक्षा तक अध्ययन की व्यवस्था है साथ ही अनुसन्धान एवं अन्य शोधपरक योजनाओं के सम्पादन के लिए भी उचित मार्गदर्शन उपलब्ध हैं। वनस्थली-विद्यापीठ के पुस्तकालय में छात्राओं के लिए एक लाख पुस्तकों का संग्रह उपलब्ध है जिसमें विभिन्न विषयों की दुर्लभ पुस्तकें छात्रों का मार्ग प्रशस्त करती है। सम्पूर्ण विश्व में घटित दैनन्दिनी-घटनाओं एवं सूचनाओं की जानकारी के लिए पुस्तकालय में 750 दैनिक, पाक्षिक एवं मासिक पत्रिकाएँ उपलब्ध है। पुस्तकीय ज्ञान के अतिरिक्त वनस्थली विद्यापीठ में रहने वाली छात्राओं के सर्वतोमुखी विकास के लिए शारीरिक शिक्षा व्यावहारिक शिक्षा-कला-शिक्षा-नैतिक शिक्षा तथा बौद्धिक शिक्षा सूचना प्रौद्योगिकी एवं अन्य वैज्ञानिक विषयों के सम्यक् ज्ञान के लिए विद्यापीठ में सुयोग्य शिक्षकों की सुव्यवस्था है वनस्थलीविद्यापीठ की सर्वतोमुखी शिक्षा के वैशिष्टय से अभिभूत अनेक छात्राएँ वनस्थली विद्यापीठ में प्रवेश के लिए उत्सुक रहती हैं। प्रतिवर्ष भारत के अनेक प्रदेशों से केन्द्रशासित प्रदेशों से एवं विदेशों से अनेक छात्राएँ अध्ययन के लिए वनस्थली विद्यापीठ में प्रवेश लेती हैं। विदेश से आने वाली छात्राओं के लिए विद्यापीठ में भारतीय दर्शन एवं संस्कृति का अध्ययन अनिवार्य है। विदेशीछात्राओं के अध्ययन के लिए प्रबन्धकों द्वारा 'शान्ता विश्वनीडम्' नामक भवन का निर्माण किया गया है जिसमें पढ़ने वाली छात्राओं के लिए विशिष्ट पाठ्यक्रम का प्रावधान है। पाठ्यक्रम में प्रमुखरूप से गाँधीदर्शन, भारतीयभाषाओं का ज्ञान, भारतीय चित्रकला, भारतीय नृत्य एवं संगीत का ज्ञान समन्वित है। वनस्थली विद्यापीठ की छात्राओं के लिए स्वावलम्बन, सरलता एवं स्वेदशी वस्त्र धारण करना अनिवार्य है। निश्चय ही अध्यात्म एवं विज्ञान के समन्वय से छात्राओं के कल्याण के लिए संकल्पबद्ध वनस्थली विद्यापीठ नामकी महिला शिक्षणसंस्था सार्थक शिक्षा के लिए अनुपम संस्था है, जहाँ शिक्षा प्राप्त करने वाली छात्राओं का जीवन सफल सुखद एवं सार्थक होता है।

आयुर्वेद-स्तम्भः

# ग्रीष्मे स्नेहं पेपीयते रविः

❑ प्रो. बनवारीलालगौडः
पूर्व-कुलपतिः

**ऋतुविभागेन संवत्सरस्य षडङ्गानि वर्तन्ते। शिशिर-वसन्त-ग्रीष्म-वर्षा-शरद्-हिमात्मकाः हि षड् ऋतवः भारतवर्षे सुव्यक्ताः वर्तन्ते विशेषेण तूत्तरे भारते। दक्षिणे भारते शिशिरस्य हेमन्तस्य च स्थितिरेव न वर्तते केवलमुत्तरभारतस्य स्थित्यनुसारमेव षड् ऋतवः भवन्तीति मन्यन्ते। दक्षिणभारतस्य स्थित्यनुसारं तु चत्वार एव सन्ति ऋतवः हेमन्तं शिशिरञ्च विहाय। अतः सुस्पष्टमेतत् यत् ग्रीष्मस्य प्रभावस्तु सम्पूर्णे भारतवर्षे भवति। भारतवर्षस्य मस्तके जम्मू-कश्मीरप्रान्तेऽपि ग्रीष्मस्य प्रभावो वर्तते, किन्तु न तत्रानुभवन्ति जनाः भीष्मं ग्रीष्मम्। सामान्यस्य ग्रीष्मस्य प्रभावस्तु तत्रापि भवत्येव। अत एव सर्वत्रैव ग्रीष्म-चर्या त्वाचरणीया।**

ऋतु के विभाग से संवत्सर के छः अङ्ग होते हैं। शिशिर-वसन्त-ग्रीष्म-वर्षा-शरद् और हेमन्त ये छः ऋतुएँ भातवर्ष में स्पष्टतः विभक्त हैं, विशेषरूप से तो उत्तरभारत में। दक्षिण भारत में शिशिर और हेमन्त ऋतुएँ नहीं होती हैं केवल भारत में ही छः ऋतुएँ होती हैं ऐसा मानते हैं। दक्षिण भारत की स्थिति के अनुसार तो केवल चार ऋतुएँ ही होती हैं हेमन्त एवं शिशिर को छोड़कर। इसलिए यह स्पष्ट है कि ग्रीष्म का प्रभाव तो सम्पूर्ण भारतवर्ष में होता है। भारत वर्ष के मस्तक जम्मू-कश्मीर प्रान्त में भी ग्रीष्म का प्रभाव है, लेकिन वहाँ लोग भीषण गर्मी का अनुभव नहीं करते हैं। सामान्य ग्रीष्म का प्रभाव तो वहाँ भी होता ही है अतः सर्वत्र ही ग्रीष्म ऋतुचर्या का परिपालन तो करना ही चाहिए।

**कश्मीर-प्रान्तं विहायान्यत्र तु रविर्भाभिराददानो जगतः स्नेहं सर्वत्र रूक्षतामुत्पादयति। तत्सम्पर्कात्तूत्तरे भारतवर्षे वायवश्चापि तीव्ररूक्षाः भवन्ति, याः हि रूक्षताया उत्पादनं कृत्वा वर्धयन्ति तां रूक्षताम्। एतद् रूक्षत्वं नृणां दौर्बल्यमावहति, आचार्यश्चरकः भीष्मस्य ग्रीष्मस्य वर्णनक्रमे स्पष्टयति यद् रविः स्वैर्मयूखैः जगतः स्नेहं पिबति, न केवलं पिबत्यपित्वत्यर्थं पिबत्यत एव 'पेपीयते' इति पदस्य प्रयोगं कृतवान्। व्याख्याकारश्चक्रपाणिः व्याख्याव-प्रसङ्गे कथयति यत् 'पेपीयते अत्यर्थं पिबति'। भीष्मेण ग्रीष्मेण सन्तप्तश्चरकोऽस्य वर्णनक्रमे सर्वेषां प्राणिनां पीडां स्तौति, यथा-**

**मयूखैर्जगतः स्नेहं ग्रीष्मे पेपीयते रविः।
स्वादु शीतं द्रवं स्निग्धमन्नपानं तदा हितम्।।
शीतं सशर्करं मन्थं जांगलान्मृगपक्षिणः।
घृतं पयः सशाल्यन्नं भजन् ग्रीष्मे न सीदति।।**

**( च. सू. 6/27-28 )**

कश्मीर प्रान्त को छोड़कर अन्यत्र तो सूर्य अपनी किरणों से संसार का स्नेह लेता हुआ सर्वत्र रूक्षता उत्पन्न करता है। उसके (सूर्य के) सम्पर्क से तो उत्तर भारतवर्ष में वायु तीव्र रूक्ष होती है, जो कि रूक्षता का उत्पादन करके उस रूक्षता को बढाती है। यह रूक्षता मनुष्यों में दुर्बलता लाती है। आचार्य चरक भीषण ग्रीष्म के वर्णनक्रम में स्पष्ट करते हैं कि सूर्य अपनी किरणों से संसार का स्नेह पीता है, न केवल पीता है अपितु अत्यधिक (स्नेह) पीता है, इसीलिए 'पेपीयते' इस पद का प्रयोग किया है। व्याख्याकार चक्रपाणि व्याख्यान करते समय कहते हैं कि 'पेपीयते' अर्थात् अत्यधिक पीता है। भयङ्कर गर्मी से सन्तप्त चरक इस के वर्णनक्रम में सम्पूर्ण प्राणियों की पीड़ा को प्रस्तुत करते हैं, यथा-

ग्रीष्म में सूर्य अपनी किरणों से संसार का स्नेह अत्यधिक पीता है, उस समय मधुर, शीत, द्रव और स्निग्ध अन्नपान हितकर होता है। शर्करा मिला हुआ मन्थ जांगल पशु-पक्षियों का मांसरस, घृत, और शालिचावल के साथ दूध का प्रयोग करता हुआ व्यक्ति पीडित नहीं होता है।

**ग्रीष्मे शरीरस्य द्रवस्य संशोषणं स्वत एव भवति, एतदतिरिक्तं शरीरात् प्रभूतस्य स्वेदस्य निःसृतिरपि भवति। अत एव शीतवीर्याणां शीतसंस्पर्शात्मकानाञ्च द्रवात्मकानां पेयानां पुनः पुनः पानं भीष्मात् ग्रीष्मात् संरक्षणं करोति। अत्र तु केषाञ्चित् पारम्परिकाणां पेयानां संकेतात्मक उल्लेखः क्रियते-**

- **सशर्करं लाजसक्तुं यावकं वा सक्तुं प्रभूते जले सम्मिश्र्य वारमेकं द्विवारं वा पेयम्।**
- **पलाण्डु-खण्डान् तक्रे विमिश्र्य किञ्चिल्लवणं भृष्टं जीरकचूर्णञ्चावचूर्ण्य पलाण्डुखण्डानां भक्षणं कृत्वा तक्रस्य पानं करणीयम्।**
- **आमन्त्वाम्रं गृहीत्वा ऽङ्गारेषु भृष्टं करणीयमथवा जले शृत्वा शीतं करणीयम्। पुनश्च जल एव विमर्द्य वस्त्रपूते हि तस्मिन् जले लवणं कृष्णमरिचं भृष्टं जीरकचूर्णञ्च स्वादानुरूपं समिश्र्य सशर्करं तज्जलं पातव्यम्।**

ग्रीष्म में शरीर के द्रव का संशोषण स्वतः ही होता है, इसकेअतिरिक्त शरीर से अत्यधिक मात्रा में पसीना भी निकलता है। इसलिए शीतवीर्य वाले और शीत संस्पर्श वाले द्रवस्वरूपक पेय पदार्थो का पुनः पुनः पान करने से भयङ्कर ग्रीष्म से संरक्षण होता है। यहाँ तो कुछ पारम्परिक पेय पदार्थो का संकेतात्मक उल्लेख किया जा रहा है -

- शक्कर मिला हुआ लाजसत्तू या जौ का सत्तू अधिक जल में मिला कर एक बार या दो बार पीना चाहिए।
- प्याज के टुकड़े छाछ में डाल कर कुछ नमक और भुना जीरा उसमें छिडककर (डालकर) प्याज के टुकड़ों को खा कर तक्र का पान करना चाहिए।
- कच्चा आम लेकर अङ्गारों से भूनना अथवा जल में उबालना चाहिए उसके बाद ठण्डा करले। पुनः जल में ही मसल कर कपड़े से छाने हुए उस जल में नमक कालीमिर्च और भुनाजीरा स्वाद के अनुसार मिलाकर शक्कर मिले हुए उस जल को पीना चाहिए।
- **परूषकं संशोद्य जले संमिश्र्य समधुशर्करं तत्पानकं शनैः शनैः पुनः पुनश्च पातव्यम्।**
- **पञ्चसंख्यात्मकानि खर्जूराणि गृहीत्वा दश संख्यात्मकानि द्राक्षाफलानि गृहीत्वा जले संस्था- पानीयानि घण्टाद्वयानन्तरं सम्यक् विमर्द्य अपूतमेव तज्जलं पिबेत्।**
- **जलानुरूपं गुडं गृहीत्वा द्वयोः सम्मिश्रणं कृत्वा पानेनानेन गुडोदकेन तृप्तिर्भवति, श्रमापहञ्चैतत्पानं पिपासानाशकं वर्तते।**
- **जले लाजसक्तुचूर्णं संमिश्र्य तर्पणं विधेयम्, ततः द्राक्षा-दाडिम-खर्जूर-परूषकान् संक्षोद्य पृथक्-जले विमिश्र्य वस्त्रपूतं यज्जलमवाप्यते तज्जलं तर्पणेऽस्मिन् विमिश्र्य पानेन दाह-ज्वर-पिपासादीनां शमनं भवति।**
- **मधूक-मृद्वीका-परूषकानि च संक्षोद्य रात्रौ जले संस्थापनीयानि प्रातःकाले च वस्त्र-पूतमेतद्धिमम् पित्तशनं तर्पणं दाहविनाशकञ्च भवति।**
- फालसा को कूटकर (कुचलकर) जल में मिलाकर मधु और शक्कर मिले हुए उस पानक को धीरे-धीरे बार-बार पीना चाहिए।
- संख्या में पाँच पिण्डखजूर लेकर तथा दश मुनक्का लेकर जल में रख दे, दो घण्टे बाद अच्छी तरह मसल कर बिना छाने ही उस जल को पीना चाहिए।

- उचित मात्रा में जल लेकर उस में गुड़ मिलाकर इस गुडोदक के पीने से तृप्ति होती है, थकान को दूर करने वाला यह पेय पिपासानाशक है।
- जल में लाजसत्तू (चावलों की खील का सत्तू) मिलाकर तर्पण (पतसा घोल) बनाना चाहिए। उसके बाद मुनक्का, अनार के दाने, खजूर और फालसों को कूटकर अलग जल से मिलाकर कपडे से छानकर जो जल प्राप्त होता है उस जल को इस तर्पण में मिलाकर पीने से दाह, ज्वर एवं पिपासा आदि का शमन होता है।
- महुआ, मुनक्का और फालसे इनको कूटकर रात को जल में रख देना चाहिए, सुबह कपडे से छना हुआ यह हिमपीने पर पित्तशमन, तर्पण और दाहविनाशक होता है।
- **जलं खर्जूरमृद्वीकामधूकैः सपरूषकैः। शृतशीतं प्रयोक्तव्यं तर्पणार्थे सशर्करम्।। (च.चि. 4/33)**
- **चन्दनोशीरलोध्राणां तरुणीदलानाञ्च जले रात्रौ संस्थापनं कृत्वा प्रातः काले वस्त्रपूतं हि तद्धिमात्मकं तर्पणं पिबेत्।**
- **शृङ्गाटकानां लाजानां मुस्तखर्जूरयोरपि। लिह्याच्चूर्णानि मधुना पद्मानां केशरस्य च।। (च.चि. 4/71)**
- **उशीरपद्मोत्पलचन्दनानां चूर्णं विधाय रात्रौ जले संस्थाप्य प्रातःकाले वस्त्रपूतं तज्जलं समधुशर्करं पिबेत्। भीष्मेण ग्रीष्मेण शरीरस्य द्रवांशस्य यत् क्षपणं भवति तस्य पूर्तिर्भवत्यनेन तर्पणेन।**
- **नाभौ कांस्यपात्रं निधाय तस्मिन् शीतलं जलं पुनः पुनः पूरणीयम्, पूर्वस्य जलस्य निर्हरणं कृत्वैव नवीनं शीतलं जलं पूरणीयम्। अनेन तीव्रोत्तापस्य दाहस्य च निवारणं भवति, अंशुघातेन पीडितानां कृते सद्यः फलप्रदो ह्येषः प्रयोगः।**
- पिण्डखजूर, मुनक्का, महुआ और फालसा इनको जल में डाकर उबाल कर ढण्डा करके शक्कर मिलाकर तर्पण के लिए प्रयुक्त करना चाहिए।
- चन्दन, खस एवं लोध्र तथा गुलाब के फूल जल में भिगोकर रात को रख देने चाहिए प्रातःकाल कपड़े से छाने हुए इस हिमस्वरूपक तर्पण को पीना चाहिए।
- सिंघाडे, लाजा (चावलों की खील), नागरमोथा और पिण्डखजूर तथा कमल का केशर इनके पृथक्-पृथक् चूर्ण को (आवश्यकतानुसार) शहद से चाटना चाहिए।
- खस लाल कमल, नील कमल और चन्दन का चूर्ण करके रात को जल में रख कर प्रातःकाल कपडे से छने हुए उस जल को शहद और मिश्री मिलाकर पीना चाहिए। भयंङ्कर गर्मी से शरीर के द्रवांश की जो क्षति होती है उसकी पूर्ति इस तर्पण से होती है।
- नाभि पर काँसे का पात्र रखकर उसमें ठण्डा जल बार-बार भरना चाहिए, पहले से जल को निकाल कर ही नवीन ठण्डे जल को भरना चाहिए। इससे तीव्रताप का (ज्वर का) और दाह का निवारण होता है। अंशुघात (लू लगने से) पीडित व्यक्तियों के लिए यह प्रयोग तत्काल फल देने वाला होता है।
- **रक्तचन्दनं जलेन सह प्रस्तरे घृष्ट्वा ललाटे तमनुलेपनं विधेयम्। अस्यैव च जले संमिश्रितस्य सितोपलया सह शार्करं विधाय पानेन दाह-ज्वर-पिपासादीनां शमनं भवति। ग्रीष्मप्रभावं निराकरोतीदं पानकम्।**
- **ग्रीष्मे यद्यतीसारो भवति तदा त्वौषधीनां समुचितानां चिकित्सकैर्निर्दिष्टानां यथा-वदुपयोगः करणीयः। पथ्याहारस्वरूपे त्वस्याः**

**पेयायाः प्रयोगः करणीयः, पेया त्वेषा निम्नोक्ता-**
**शालपर्णीबलाबिल्वैः पृश्निपर्ण्या च साधिता।**
**दाडिमाम्ला हिता पेया पित्तश्लेष्मातिसारिणाम्।।**

- **गुलाबगुलकन्दस्य पञ्चविंशति ग्रामपरिमितस्य ग्रामत्रयपरिमितेन शतपुष्पाचूर्णेन सहचर्वणं कृत्वा प्रातःकाले प्रयोगः करणीयः।**
- **मुरब्बानामधेया या कल्पना विद्यते तस्यां सुकल्पित-स्यामलकीफलस्य या मुरब्बा कल्पना भवति तस्याः प्रयोगः पर्याप्तो भवति।**
- **शतपुष्पां ग्रामत्रयपरिमितां 'पोस्त के दाने' ग्रामत्रयपरिमितां तरुणीदलस्य ग्रामैकं वातादानां पञ्च फलानि कृष्णमरिचस्य च फलपञ्चकं गृहीत्वा तत्रैव संशुष्कानां कर्कटीबीजानां खर्बुजबीजानां कूष्माण्ड-बीजानां तरबूज-बीजानाञ्च सम्मिलितानां ग्रामत्रयपरिमितां मज्जां गृहीत्वा सर्वान् जले प्लुतान् घण्टाद्वयपरिमितान् संस्थापितान् पेषयतु सम्यक् पिष्ट्वा च जले संमिश्र्य वस्त्रपूतं तत्पेयं सशर्करं पेयम्। राजस्थानप्रान्ते ठण्डाई नाम्ना प्रसिद्धस्यास्य प्रयोगस्य दाहापहारकत्वं सुविख्यातम्।**

**ग्रीष्मे यं स्नेहं रविः पेपीयते तस्य निवारणमेभिः प्रयोगैर्भवति।**

- रक्तचन्दन जल के साथ पत्थर पर घिसकर ललाट पर पतला लेप करना चाहिए। इसी का जल में मिलाए हुए का मिश्री के साथ शर्बत कनाकर पीने से दाह, ज्वर, पिपासा इत्यादि का शमन होता है। यह पानक ग्रीष्म के प्रभाव को दूर करता है।
- ग्रीष्म में यदि अतीसार हो जाता है तो चिकित्सक के द्वारा बनाई गई उपयुत औषधियों का यथावत् उपयोग करना चाहिए। पथ्याहार के रूप में तो इस पेया का प्रयोग करना चाहिए। पेया तो यह निम्नलिखित है-
- शालपर्णी, खरेटी, बेलगिरी और पृश्निपर्णी से सिद्ध की गई तथा अनार के दाने या रस से अम्ल की गई पेय (पतले दलिया, पतली खिचड़ी या राबड़ी आदि) पित्त-श्लेष्मजन्य अतीसारवालों में लाभदायक है।
- गुलाब का गुलकन्द 25 ग्राम तथा सौंफ का चूर्ण 2 ग्राम, लेकर चबा कर प्रातःकाल प्रयोग करना चाहिए।
- मुरब्बा नाम की जो कल्पना है उसमें अच्छी प्रकार से बनाए गए आँवले के ताजा फलों का जो मुरब्बा होता है उस मुरब्बा कल्पना का प्रयोग समुचित मात्रा में करना चाहिए। दो आमलकी फलों का प्रयोग ही उपयुक्त है।
- सौंफ 3 ग्राम, पोस्त के दाने 3 ग्राम, गुलाब के फूल एक ग्राम, पाँच बादाम, काली मरिच 5 नग, इसी में काकड़ी के बीज, खरबूजे के बीज, कद्दू के बीज और तरबूज के बीज इन सभी बीजों की मींगी (छिलका रहित बीज) सम्मिश्रित 3 ग्राम की मात्रा में लेकर दो घण्टे तक पानी में भिगोकर अच्छी प्रकार से पीसकर जल में (इस पिष्टी को) मिला कर कपडे से छानकर शक्कर मिले हुए इस पेय को पीना चाहिए। राजस्थान प्रान्त में ठण्डाई के नाम से प्रसिद्ध इस प्रयोग का दाह को दूर करने का गुण सुविख्यात है।

ग्रीष्म में जो स्नेह रवि के द्वारा अत्यधिक पीया जाता है, उसका निवारण इन (उपर्युक्त) प्रयोगों से होता है।

**80, सेनापति हाउस के पीछे, प्रेमनगर,**
**झोटवाड़ा, जयपुर**

पठतु संस्कृतम् राजस्थान–सर्वकारः जानातु भारतम्

# निदेशालयः, संस्कृत–शिक्षा, राजस्थानम्, जयपुरम्

(द्वितीयतलम्, ब्लॉकसंख्या 06, शिक्षासंकुलः, जवाहरलालनेहरुमार्गः, जयपुरम्–302015)

☎ 0141-2704357-58

## वैशाख–ज्येष्ठ वि.सं. २०७३ (शा.सं. १९३८)

## मईमासः, २०१६

| | | | | | |
|---|---|---|---|---|---|
| रविवासरः | १ | ८ | १५ | २२ | २९ |
| सोमवासरः | २ | ९ | १६ | २३ | ३० |
| मंगलवासरः | ३ | १० | १७ | २४ | ३१ |
| बुधवासरः | ४ | ११ | १८ | २५ | – |
| गुरुवासरः | ५ | १२ | १९ | २६ | – |
| शुक्रवासरः | ६ | १३ | २० | २७ | – |
| शनिवासरः | ७ | १४ | २१ | २८ | – |

**कार्यदिवसाः ०८** **रविवासराः ०५** **अवकाशाः १८** **उत्सवाः ०१**

२६ अप्रैलतः १० मईपर्यन्तम् – नवीनसत्रं २०१६–१७ इत्यस्य प्रवेशप्रक्रिया शिक्षणकार्यारम्भश्च ।

०७ मई – रवीन्द्रनाथटैगोर–जयन्ती (उत्सवः)

०७–०९ मई – कक्षा ०९ तथा ११ इत्यस्य पूरक–परीक्षाणाम् आयोजनम् ।

१० मई – सत्रान्तस्य शिक्षक–अभिभावक–परिषदः उपवेशनस्य आयोजनं पूरकपरीक्षा परिणामस्य घोषणा च।

११मईतः २०जूनपर्यन्तम् – ग्रीष्मावकाशः।

**टिप्पणी –** १. संस्थाप्रधानः ग्रीष्मावकाशे मुख्यालयाद् बहिः भवेत् चेत् सः विद्यार्थिभ्यः दीयमानानां स्थानान्तरण–प्रमाणपत्राणाम् (टी.सी.) उपरि हस्ताक्षरं कर्तुं तत्रत्यं वरिष्ठशिक्षकम् अधिकृतं कुर्यात् , एतस्य अनुमोदनञ्च सम्बन्धित–सम्भागीय–संस्कृत–शिक्षाधिकारिणा कारयित्वा सम्बन्धितम् (वरिष्ठ–शिक्षकम्) आदिशेत्, येन विद्यार्थिभ्यः टी.सी. प्रापणे असुविधा न भवेत्।

२. सेवारत–शिक्षक–प्रशिक्षणानाम् आयोजनम् ।

३. माध्यमिक–शिक्षा–बोर्ड–राजस्थान–अजमेरद्वारा विद्यार्थिभ्यः सृजनात्मक–प्रतियोगितायाः राज्यस्तरे आयोजनम्।

प्रेषण–प्रत्येक माह की ५ तारीख सी.एस.ओ. गांधीनगर, जयपुर
पंजीयन क्रमांक (भारत) आर. एन. आई. ३७५८–५७

डाक पंजीयन
Jaipur City/429/2015-17

हार्दिक शुभकामनाओं सहित :-

# ए इन्फ्रास्ट्रक्चर लिमिटेड

निर्माता

## ए.सी. प्रेशर पाइप्स

तकनीकी रूप से सर्वोत्तम, पेयजल, कृषि, सीवरेज एवम् सेनिटेशन में उपयोगी
तथा धातु निर्मित पाइपों की अपेक्षा सस्ते और टिकाऊ
फाइबर सीमेंट की नालीदार चादरें

**छत एक, लाभ अनेक**

हमीरगढ़ भीलवाड़ा - 311025 (राजस्थान) दूरभाष: 01482-286106/07
दिल्ली कार्यालय: ए-9, ग्रीन पार्क मैन, नई दिल्ली-110016 दूरभाष:- 011-26850488
जयपुर पाइप कार्यालय : 411, तीसरी मंजिल, शालीमार काम्प्लेक्स, चर्च रोड़, एम.आई.रोड़, जयपुर
फोन: 0141-2369691, 2370566, फैक्स : 0141-4019691
जयपुर चादरें कार्यालय: शोरूम नं. 2, फर्स्ट फ्लोर, नियर रिद्धी-सिद्धी स्वीट्स, लिंक रोड़, गोपालपुरा, जयपुर
फोन : 0141-3206915, फैक्स:- 0141-2763656

## राष्ट्रीय विचारों के लिए पढ़ें

# पाञ्चजन्य Organiser

हमारी विशेषताएं

- राष्ट्रीय दृष्टिकोण
- 6 दशकों से लगातार प्रकाशित
- संसद तथा विधान सभाओं को गुंजायमान करने वाला पत्र
- विश्वसनीय प्रतिष्ठित दायित्वपूर्ण पत्रकारिता
- हजारों शैक्षिक, व्यावसायिक प्रतिष्ठानों एवं पुस्तकालयों में पहुंच
- ई–पेपर की सुविधा

You can subscribe **Panchjanya/Organiser** Weeklies Online
through our **Websites: www.panchjanya.com, www.organiser.org**

**ग्राहक शुल्क भारत में : वार्षिक शुल्क रु. 625/- एवं द्विवार्षिक रु. 1100/-**

विदेशों में (हवाई डाक द्वारा) : वार्षिक शुल्क ... $ 60

**Reach millions of consumers through our weeklies**

## भारत प्रकाशन (दिल्ली) लि.

2322, लक्ष्मीनारायण स्ट्रीट, पहाड़गंज, नई दिल्ली-11005 www.organiser.org & www.panchjanya.com
दूरभाष: 011-47642000 से 30 फैक्स: 011-47642015 E-mail: circ@pbdl.in

स्वत्वाधिकारी–भारतीयसंस्कृतप्रचारसंस्थानम्, राजस्थानम् दूरभाषः २३७९०१४ प्रकाशको मुद्रकश्च माणकचन्द माहेश्वरी द्वारा न्यू जय शिवा प्रिन्टर्स, गोपालबाड़ी, जयपुरम् दूरभाषः २३६५७२१ पत्रसंकेतः– भारतीभवनम्, बी–१५ न्यू कॉलोनी, जयपुरम्–३०२ ००१ भारतीयसंस्कृतप्रचार संस्थानस्य अध्यक्षः शंकर प्रसाद शुक्लः

प्रतिष्ठायाम्,